नेनहंसइतिमंत्रेणअनयानमितिपूज्यप्रदीपः नेनावनासोहमितिमंत्रोसिद्धिः वस्तुनश्चि
न्मंत्रेणसुषुम्नेणयोजयेत्परमात्मनि इतिश्रुतेः उभयोरेवचिन्मात्रत्वमविरुद्धमिति तत्त्वा
नियंचविंशतिश्चतुर्विंशतिर्वा तदुक्तंप्रपंचसारे भूतेंद्रियेंद्रियार्थैःरुद्धिष्टानत्वपंचविंशति
कं करणैर्यतैरेतैस्तत्त्वान्युक्तानितत्त्वदर्शिचरणाद्यैरिति इंद्रियाणिज्ञानेंद्रियाणिपंचक
र्मेंद्रियाणिपंच इतिदशेंद्रियाणामर्थाश्चदश अंतःकरणंमनोबुद्धिरहंकारश्चित्तंचपरि ३४
कीर्तितं इति पृथिव्यप्तेजोवाय्वाकाशाः गंधरसरूपस्पर्शशब्दाः घ्राणरसनाचक्षुस्त्वक्श्रोत्र
वाक्पाणिपादपायूपस्थवचनादानगमनविसर्गानंदात्मकंपंचविंशतितत्त्वानिबीजभा
वेनतत्रलीनानिविचिंत्य इत्यावृत्त्यपूर्वमनंतरमितिबीजंसबलकंसरेत्तंजीएवंकलभवनोऽह्नेष

34A

68 नकारं स्वकं देहं तेन च तनवपुषाद्र्यं सकलं विप्रोष्टाव्यामं चोन्यवनं अधमार्गेणाणामुणेः तेनै
व मार्गेण विलीनमारुतं बीजं विचिन्त्यारुणमाशुभ्रुस्ताणे आस्थ्यर्गरहं पारिगृह्य वामनेनानुचेत
समीरं सहतन्मना बहिः स्वमणोमार्गेण सूर्यवत्मेन तावपरमतीवशुभ्रमतीद्दतोन तम्पुपयेनवि
धनयत्तं च द्वललाटचंद्रम सतः सकलाणिमयी पलरजपा न्त्रियात्म रचयेच्छ्रनया सकलं त्वपुर
स्तेनोच्च वृष्टमपवज्रा वराद्यमिदं हयरं विध्वंव मितिचंद्रबीजमित्यर्थः अस्ततः ललाटचंद्रा
त् लपारजपाल पालकारस्यपरोवकारः तस्य जपात् वमिति अस्त बीज जपात् अस्तै
यं हृष्टिं निपात्य तया वसिष्टम सम्नासकलं वपुरचयेत् इति प्रदीपः एवं ततः संशोषयेद्देहं
वायुबीजेन वायुना वायुबीजेन तेनैव संदहेत् सकलं तनुं विश्लेषयं तदा दोषानस्तेना
स्तना भस्म आपाद्य प्लावयेद्देहं आपादतलमस्तकं संजाते निर्मले देहे देवतारायन स्त
मे आत्मलीनानि तत्त्वानि स्वस्थाने पापयेत् ततः आत्मानं हृदयाम्भोजमानयेत्परमात्मनः
मनुनाहंस देवस्य कुर्यान्न्यासपदकं ततः न्यासादिकं स्वतन्त्रोक्तं हंसदेवमन्त्रो हंसः इति उ
क्तं च सारसमुच्चये सं योज्य जीवमपरं गमनमध्यनाडीमार्गेण पुष्करनिविष्ट शिवेषु स्वस्थे हं
सेन देहममरं द्रुपुरोगानन सार्धेडना भसि तस्मात् हृदयीन्त्वद्य इति तथाचोभयपक्षमपि

प्रा॰ 69 प्रामाणिकं अमरेंद्रपुरोगतेन प्रथमेन रेफमेहेत्यर्थः पूरकं षोडशमात्रया कुंभकं चतुष्
क॰ षष्टिमात्रया रेचकं द्वात्रिंशन्मात्रया इति भावः अयमपि प्राणायामविशेषः प्राणायामेन च
तथा न स्यात् स्वदृश्यमाणत्वात् अत्र केचित् पापपुरुषस्य शोधनाधिकं वदंति तन्मते कुक्षौ पाप
पुरुषं चिंतयेत् यथा ततः पुरुषं निर्मं पापमनादिभवसंचितं ब्रह्महत्याशिरस्कं च स्वर्णस्ते
यभुजद्वयं सुरापाणहृदा युक्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकम्
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् खड्गचर्मधरं कृष्णं कुक्षौ दद्यादितः स्वरेण वामकु
क्षौ विचिंतयेदिति पाठः ततः संशोषयेद्देहं रकारादिक्रमेण वै गुरुतल्पे निगुरुतल्पगमने
नेत्यर्थः विदध्यान्मातृकान्यासं इति वचनात् मातृकान्यासस्य वक्ष्यमाणत्वात् तथा च मातृका
मंत्रस्य ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रीछंद ईरितं सरस्वती समाख्याता देवता मातृकाक्ष
या हलः स्वराः समाख्याता बीजानि शक्तयस्तथा शिरोवदनहृद्गुह्यपादेष्वृष्यादिकं न्यसेत् १९
षडंगानि विधेयानि जातियुक्तानि देशिकैः अंगुष्ठादिष्वंगुलीषु न्यसेदंगे सजातिभिः अंत
तलयोर्न्यसेत् कुर्यात् तालत्रयं ततः दिशां बंधं च बध्नीयाच्छोटिकाभिः समंततः हृदादिषु च वि
न्यसेदंगमंत्रांस्ततः सुधीः हृदयाय नमः शिरसे वह्निवल्लभा शिखायै वषडित्युक्तं क

35A

70 वचायहुमीरितम् नेत्रत्रयवौषट् स्यादस्त्रायफडिति क्रमात् षडंगमंत्रानिमुक्त्वा षडंगेषु
नियोजयेत् षडंगानि मनोर्यस्य न स्युस्तेन तमनुं त्यजेत् अंगहीनो मंत्रः स्यात् स्वेनैवांगानि कल्पयेत्
जातयश्च नमः स्वाहा वषट् हुं स्याद्वौषट् फट् क्रमादेव जातिषट्कमिदं प्रोक्तं हृदाद्यास्त्रान्तसं
युतम् अस्त्रं तु तलयोरिति यद्यप्यस्त्रं तु तलयोर्न्यसेदिति वचनात् पंचांगपक्षेपि अस्त्रन्यासः
करतलयोरेव तथापि कवचपर्यन्तं हृदयं पंचांगमंगुलिपंचकं इति क्रमदीपिकावचनात् क
निष्ठयोरेवास्त्रन्यास इति कवचमंत्रस्तु पंचमस्वरयुक्तो हकारः पंचमस्वरः ह्रस्वः उकारस्तद्
युक्तो हकारस्तस्य बिंदुर्विभूषणं तेन हुमिति बीजं भवति तथा च कवचायेति पंचमस्वरयुक्तो
हकारो हुमिति कवचमंत्रः सवषट् शिखा हुमिति वर्मणीरितं इति क्रमदीपिकावचना
त् अन्यथा नेत्रत्रयोद्देशाभावात् अथवा विना मंत्रेण दीर्घेण तनुच्छदमित्यभिहितं तथा चोभ
योरेव कवचमंत्रत्वमाप्यते नेत्रत्रयायेति संभवत्कृत्ये किमिदं यत्र तु नेत्रत्रयं तत्र नेत्रा
भ्यामिति वक्तव्यं अंगहीनं स्यादनुक्तांगमंत्रस्य स्वेनैव मूलमंत्रेणैव अत्र करन्यासे अंगुष्ठा
भ्यां नम इत्यादि प्रयोगप्रमाणाभावात् तदंगपंचकं तथा याथासमीरितं करे इति क्रमदी
पिकावचनात् हृदयाय नमः इत्येव प्रयोगः इति प्रजादीपः तत्र अंगुष्ठादिष्वंगुलीषु

36

श्री॰ 71 न्यसेदंगैस्सजातिभिः इति शारदातिलकवचनार्थानुरोधात् तस्यार्थः अंगुलिसजातिभि
क॰ रंगैरंगुष्ठादिष्वंगुलीषु न्यसेत् अयमर्थः तत्तदंगुलिमानान्यं हृदयादिष्वपि इति वाच्यो व्यवहृभ
विरोधादिति किंच क्रमदीपिकावचनास्याप्ययमेवार्थः यथा यत्प्रकारेणांगपंचकं क
रेसमीरितं तथा तत्प्रकारेणैव हृदयेपीति अपिच आदौ पंचांगमस्मनुच्चार्य मंत्रे पश्चात्प्र
सेन्नुधीः इति वचनाविरोधात् करन्यासे इत्यभिधानस्याव्यर्थत्वात् तस्मादंगुष्ठाभ्यां
नमः इति प्रयोगः वह्निजायेतीति वचनात् स्वाहादिपदप्रयोगोनुसरणीयः तत्सन्यादौ वे
वकरांगन्यासौ विधाय मात्रकान्यासं कुर्यात् यथा पंचाशल्लिपिभिर्विभक्तमुखदोः प
न्मध्यवक्षस्थलां भास्वन्मौलिनिबद्धचंद्रकलामापीनतुंगस्तनीं मुद्रामक्षगुणं सुधाढ्य
कलशं विद्यां हस्तांबुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये पंचाशल्लिपिभि
रिति अकारादिक्षकारांतलिपिभिर्यथाक्रमेणांगमस्तकं विंतनीयं तदुक्तं प्रपंचसारे अ ३६
कटतपयाद्यैस्सप्तभिर्वर्णवर्गैर्विरचितमुखबाहूपादमध्याहृत्का इति मुद्रादिकं दक्षिण
यः क्रमेण प्रदक्षिणेपन मुद्रास्थानमुद्रा अथांगुष्ठतर्जनीयोगात् ज्ञानमुद्राप्रकीर्तिता
इति स्थापनान्याह ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः ओष्ठदंतोत्तमांगास्यदोःपत्से

36A

72 धाग्रकेषु च पार्श्वयोः पृष्ठे तो नाभौ जठरे हृदयांसके ककुद्यंसे च हृत्पूर्वं पाणिपादयुगे
अपि जठराननयोर्न्यसेन्मातृकार्णान्यथाक्रमात् केषांचिन्मते हृदयादिषु अंसादिषु रेफ
न्यासः पादयोः श्रवो भुजयोः स्वस्तके न्यासः उमायंता नमो ज्ञात्वा सविंदुबिंदुवर्जितः पंचा
शद्वर्णन्यासः क्रमेणैवं विधेय यतो इति विश्वसारस्य वचनात् अत्र केचन्नांतः सविसर्गाः सानु-
स्वारः सृष्टिक्रमेण विसर्गबिंदुसहितानां स्थितिक्रमेण सबिंदूनां संहारक्रमेण न्यासः स्थित्यादौ
न्यासे विशेषः तदुक्तं शारदातिलके न्यसेत् सर्गान्वितान् सृष्टावाद्यावादेशीयथाविधि सर्गबिंदु
नितान्न्यसेद्वर्णान् स्थितिवर्त्मना तथा च वैशंपायनसंहितायां बिंदुसर्गान्वितान् न्यसेत् कुलफा
दिस्थितिवर्त्मना ज्ञात्वेतं च ततो देवि हृत्स्थानं भवेदयं डकारादिर्वकारांतं योजयेत्परदेव
तो इति विद्यान्सर्वोदितानि हान्यादीनां समं युतो ध्यायेदर्णेश्वरीमत्र वल्लभेन समन्विता
म् वल्लभो महेशस्तेन संयुतां तस्य ध्यानमाह सिंदूरकांतिमभिताभरणां त्रिनेत्रं विद्याक्षसूत्र
मृगपोतवरं दधानं पार्श्वस्थितं भगवतीमपि कांचनांगी ध्यायेत्कराब्जधृतपुस्तकवर्णमालां
विशेषाभिधानात् बिंदुसर्गरहितोपि सृष्टिक्रमेणैव न्यासः प्रथमोपस्थितत्वात् अकारादि-
दकारांतन्यास एव सृष्टिप्रकारः स्थितेनिषा च चेष्टाणां यामिति दकारादिवकारांतपर्यं

37

श्री 73 तेविन्यस्य अकाराद्यैकारांतान्विन्यसेदिति केवलबिंदुयुक्तान्न्यासमाह बिंदुयुक्तानिमां
क न्यसेत्सेहत्यप्रतिलोमतः विद्याद्यैर्वीदितान्न्यासान्न्यासादीनंगसंयुतान् ध्यायेद्गणेशमयेपमे
देवीवाग्बलतोषिवां अदक्षजंहरिणपोतमृदंग्रटोंकं विद्यांकरैर्दधतिरंतदथतेत्रिनेत्रां
अर्धेंदुमौलिमरुणमरविंदभासां वागीश्वरीप्रणमतस्तनभारनम्राम् सेहत्यन्यन्यसेवषवि
वर्णप्रतिलोमतः इतितथाचन्द्रकारमकभ्यअकारपर्यंतंन्यसेदित्यर्थः अन्यप्रकाराच्चगौ
रवभयान्नलिखितः प्राणायामेष्ववस्यामिसर्वतंत्रानुसारतः पवनसंयमनेतमनुनाचरेद्य
स्मिहजमृमनुमिछति अथवाअखिलेषुहरिमंत्रजपादिषुमूलमेवतः इत्यनेनमूलमेवा
स्याभिधानात् अथवाश्रेगजन्ममनुनामहसंयमेसकलेषुकर्मसुजपकर्मसुमादिनेकस्य
क्रतिवारमभ्यसंसनुयात्समसंडरितापहारिणाइत्यादिनाबीजस्याभिधानात् तस्मा
दुभयपक्षकीर्तनादेकदेशोन्वयः तथाचेछाविकल्पः मूलमंत्रमेवेष्टान्तरोगोपालमं ३८
त्रः क्रमदीपिकायांतथैवमूलमंत्रत्वेनाभिधानात् दशान्तरोक्तपंदांतरमाह अथवास्सा
धकः कुर्यात्प्रणवेनास्तुसंयमम् स्त्रीभिःशूद्रैश्चकर्तव्योलौकिकेनास्तुसंयमः त्रिविधश्चा
दशवारंवापरितःपरितोभ्येजपेत् परतःपरतत्रिपरःपरइत्यर्थः शुचिःप्राणायामोप्रण

74 वसहितोषोडशावृत्तीप्रभातेसायंचषष्टिदिवसमेवंवितनुते द्विजोयंतेनभ्रूणप्रहरणात्कृ
तोहोविकलितेपुनेत्येतेसमादिहृदुरिततूलोघदहनः प्रभातेसायंचद्वयत्रफलभूमौ
श्रेष्ठात्रयात्मकः सायंपूरककुंभकरेचकैः प्राणायामस्तावद्द्विविधोभवति सगर्भोऽगर्भश्च
जपध्यानादिभिर्युक्तंसगर्भंतंविदुर्बुधाः तदयेतमगर्भंवाप्राणायामंपरेजगुः तत्प्रकारमाह
इडयाकर्षयेद्वायुंबाह्यंषोडशमात्रया धारयेत्पूरितंमंत्रीचतुष्षष्ट्यातुमात्रया सुषुम्नामध्य
केसम्यक्द्वात्रिंशन्मात्रयाशनैः नाड्यापिंगलयाचैनंरेचयेद्योगवित्तमः प्राणायाममिदंप्रा
हुर्योगशास्त्रविशारदाः भूयोभूयाक्रमात्तस्यव्यत्याससेनसमाचरेत् मात्रावृद्धिक्रमेणैवसम्य
क्द्वादशषोडश इडयेतिप्रपूरणेप्रथमप्राणायामाभिप्रायेणद्वितीयपिंगलयैवप्रपूरणात्
येनैवसंत्यजेत्तेनपूरयेदितिश्रवणात् यथापूरणंतदन्ययारेचनमिति सकलप्राणायामा
नुगतं षोडशमात्रयेत्युपलक्षणं मात्रावृद्धिक्रमेणैवेत्यादिनाधिकेनापिपूरणश्रवणात्
स्तनतुमात्रसंहितायाम् दक्षिणयारेचयेद्वायुंद्वात्रिंशन्मात्रयाततः मात्राचतदुक्तंमार्क
ण्डेयपुराणे निमेषोन्मेषणेकालामात्रइति इडयावाकर्षयेद्वायुंमनोषोडशमात्रया सुषुम्ना
मध्यगंकृत्वाविद्यावद्वारणधारयेत् येनैवपूरयेद्वायुंतेनैवंरेचयेत्सुनः उभयोमध्यगंकृत्वा

38

अ· 75 तत्रमंत्राभिधारणम् पीठन्यासमथोवक्ष्ये यथावदवधारय कल्पयेदात्मनोदेहे पीठंधर्मा
क· दितःक्रमात् धर्मंज्ञानंचवैराग्यमैश्वर्यंविन्यसेत्क्रमात् मुखपार्श्वेनाभिपार्श्वे अधर्मादींप्रक
ल्पयेत् धर्मादयस्स्मृताःपादाःपीठपात्राणिचापरे अनंतंहृदयेपद्मंअस्मिन्सूर्येंदुपावकाः
सत्वादित्रिगुणान्न्यासेत्तथैवात्रगुरून्नमः आत्मानमंतरात्मानंपरमात्मानमेवच ज्ञानात्मानं
न्यसेन्मंत्रमात्र्यावीजपूर्वकं प्रणवाद्यो ऋष्यादिन्यासनंतरंपीठन्यासउक्तः ततश्चोपास्य
मंत्रस्यन्यासाऋष्यादिकांश्चरेत् तथाचविशुद्धेश्वरेतंत्रे ऋषिन्यासोमूर्ध्निदेशेछंदस्तु
मुखपंकजे देवताहृदयेचैवबीजंचगुह्यदेशके शक्तिंचपादयोश्चैवसर्वांदिकीलकंन्य
सेत् ऋषिस्तु महेश्वरमुखाज्ज्ञात्वायस्साक्षात्तपसामंत्रं संसाधयतइतिमुख्यात्मामतस्यऋषि
इतिः गुरुत्वान्मस्तकेचास्यन्यासात्परिकीर्तितः सर्वेषांमंत्रतत्वानांछादनाछंदउच्यते
अक्षरत्वात्पदत्वाच्चमुखेछंदःसमीरितम् ऋषिछंदोपरिज्ञानान्नमंत्रःफलभाग्भवेत् दौर्बल्यंया ३८
तिमंत्राणांविनियोगमजानतः इतिन्यासादिऋष्यादेःस्यावश्यकत्वमितिभावः मंत्रशास्त्रेत
थाचोक्तंप्रामंमंत्रेणधीमता यस्यमंत्रस्यतेन्यासःकर्तव्याशुद्धिमिच्छता जपतर्पणहोमा
वांसिद्धिमंत्रहृतानापि अंगन्यासादिभिर्हीनानदास्यंतिफलान्यमी न्यासस्समस्तान्न्यसेत्ततः

38 A

76 स्वदेहे त्रैलोक्यमेतद्दृश्यमेनिधुसः पापानि सर्वाण्याः प्रशमं प्रयान्ति त्रस्यन्ति भूतानि सयन्त्र
गानि आदौ ऋष्यादिन्यासः करन्यासमनेनतः ततो व्यस्तन्यासः पदन्यासस्ततः परम्
पदैर्भिः पदन्यासेप्यनुषज्जते औत्सर्गिकक्रमोयं क्वचित्कल्पान्तरे नापि बाध्यते पुरश्चरण
चंद्रिकायां च अंगन्यासं विधाय ऋष्यादिन्यासः उक्तः ध्यानस्वरूपमाह ध्यानं चात्मेष्टदेवस्य
मनसा वेदनं मतं यज्जीवब्रह्मणोरैक्यं सोहंस्यादिति वेदनं तन्निर्गुणं हृदयांभोजकर्णिका
केसरान्वितां स्वेष्टदेवतां तत्र ध्यायेदागमदर्शितां एवं यद्वेदनं तत्तु सगुणं ध्यानमुच्यते
एवं ध्यात्वा तथात्मानं पूजयेद्बाह्ययोगतः आत्मा यतनं चतुष्कोणं षडस्रं च त्रिकोणकं सामा
न्यार्घ्यजलेनैव वक्ष्यत्यंगानि प्रपूजयेत् अग्नेयादिषु कोणेषु हृदाद्यंगचतुष्टयं नेत्रमग्रे दिशा
स्वस्त्रमलेन ताडितं ततः वेदिकायां प्रविन्यस्य तालयेत् खमस्त्रतः साधारं स्थापयेद्वि
द्वान्नाम तो वह्निमंडले वह्निमंडले त्रिकोणं तत्र गंधादिकं दर्विप्रस्थिपे हृदयाणुना आदि
पादा [illegible] पुष्पाक्षतपरिग्रहः हृदयाणुनानमश्रीतमंत्रेण अर्घ्यस्वरूपमाह गंधपु
ष्पाक्षतयवकुशाग्रतिलसर्षपैः सहदूर्वैः सर्वदेवानामर्घ्योयं परिकीर्तितः पुराणमाह
श्वेतहिमलपयसा सुधीरद्वैतैः प्रतिमातैः शिरोंतगैः अर्घ्यैर्मातृकावर्णैः प्रतिमातैर्विलो

श्री॰ 77 मस्त्रैः फिरितैर्गैः स्वाहांतैः अद्धतैरपि केचित् विलोममातृकामंत्रपालनं ततः मूलमंत्रोऽपि
कृ॰ ठनीयः इत्यपि केचित् तत्र तीर्थमनुनापि वाहयीत्तीर्थमुसहविमंडलात्सुभः सौयदत्कम
लनाहृरितयागालिनीतद्व परिग्रहयेत् तज्जलेनयनमंत्रवीक्षितं वर्मणासमवगुंठ्यदोर्घु
ज्ञा मूलमंत्रसकलीकृतंन्यसेदंगकैःसकलयेद्विपोस्त्रतः नयनमंत्रवीक्षितंवौषडितिमंत्र
वीक्षितं वर्मणाहुमितिमंत्रेण तीर्थवाहनमंकुशमुद्रया तदंकेगौतमीये तीर्थमावाहये
द्विहंसमुद्रयाकुशासंज्ञया प्राक्प्रदर्शितोयं तीर्थमंत्रः सकलीकृतमभिमंत्रितम् तथाच
प्रणवदायां मूलमंत्रंजपेत्सप्तधाजपेत्सांगमंत्रवित् धेनुमुद्रयामृतीकृत्यसकलीकरणं
तदंके अमृतीकरणंकृत्वा चिंतयेदिष्टदेवतां अंगन्यासेनसकलीकृत्यास्त्रेण दिशोदश अदि
ताद्दिपुतमवगुंठीकृतंसंस्पृश्य जपतिमंत्रमष्टधाः मत्स्यमुद्रयाछाद्यजपेत् तदंके अष्टकृ
त्वोजपेन्मूलं तंआछाद्य मत्स्यमुद्रयेति दक्षिणेप्रोक्षणीपात्रमादायाद्भिः प्रपूरयेत् किंचिद् २५ १८
ग्राबुसेच्यप्रोक्षणींपाभसिपितये प्रोक्षणीपात्रतोयेनतेनात्मानं त्रिवारतः प्रोक्ष्यपुष्पा
दिकंचापिमूलेनप्रोक्षतस्तथो दक्षिणे सर्वास्थापितार्घ्यस्य दक्षिणे प्रोक्षणीचकरेणैव प्रोद
येत्क्षिजलनतंततमोमुना त्रिःकरेणमनुनातयाविलम् साधनेकुसुमचंदनादिकं इतिपाद्य

78 स्याचमनीयनीयस्यमधुपर्कस्य चाप्ययपात्राण्याधारयुक्तानि स्वर्णादि वितानि च स्थाप्य।
येसुरतस्तानि स्थापयेद्धास्त्रवर्त्मना। पाद्यादिपात्रस्थानेमाह अर्घ्यस्य वा जरतः कार्यपाद्यमाच
मनीयकं इतिवचनात्स्वरूपमाह पाद्यश्यामाकदूर्वाब्जविष्णुक्रान्ताजलैः स्मृतम् जातील
वंगकक्कोलजलैराचमनीयकं आज्यंदधिमधुमिश्रं मधुपर्कं समीरितः पुनराचमनीयं
केवलजलेन तदङ्गं गोतमीये तेनैवमनुनाकुर्याददद्भिराचमनीयकम् एकस्मिन्नपि पात्रे वा
पाद्यादीनि प्रकल्पयेत् सर्वोपहाररूपस्य नामभावे भावयेद्धिया सर्वोपहारइति उपहारवि
शेषाभावे मनसाकल्पयामि इतिस्रजादीपः तस्थितं सामान्याभावपरिमितमिति निकर्षः
अथमानसपूजा अथमूर्धनिमूलचक्रमध्ये निजनाथं गणनायकं समर्च्य व्यसनक्रमतः स्व
पीठमंत्रैर्जलगन्धाक्षतपुष्पधूपदीपैः प्रजपेद्यमूलतोयो निजमूलेहृदयेभ्रुवोस्त्वमध्ये
त्रितयं स्मरतः स्वदेवदेहं कीकृतमानेदयनं तडिल्लताभं तन्मेजोगैः साव्ययवीकृत्य निजनाथं गु
रुंपीठमंत्रैः ॐ आधारशक्त्यै नमः इत्यादिमंत्रैः स्मरतः कामबीजेनेत्यर्थः ततः संपूजयेद्देवं
गंधाद्यैर्मूलमुच्चरन् पंचकृत्वः पुनः कुर्यात्पुष्पांजलिमनन्यधीः उत्तमांगे हृदाधारे पादसर्वा
गके क्रमात् अथवा पाद्यादिदत्त्वा समर्चयेद्गंधपुष्पाद्यैः तांबूलनर्तनगीतवाद्यैः स्तोत्रैश्चुल

श्री॰ 79 कसलिलेन ब्रह्मार्पणाख्यमनुना कुर्यान्महात्मार्पणं मंत्री अर्घ्यपात्रमंत्रास्तु अग्रे लिख्यन्ते मान
क॰ सस्नानाद्यं नैवेद्यं नास्ति विना नैवेद्यं गंधाद्यैरुपचारैः प्रपूजयेत् इति वचनात् गुरूपदिष्ट
विधिनाघ्राणं मन्याद्विधापयेत् शेषं तत्र नास्त्येव इति मानसीपूजा बाह्यपूजां प्रवक्ष्यामि मंत्रि
णां हितकाम्यया एवं देहद्वये पीठे चिंतयेदिष्टदेवताम् मुद्राप्रदर्शनविधिवदर्घ्यस्थापनमा
चरेत् इति वचनात् अर्घ्यस्थापनमिदानींतद् उच्छिष्टानं दीक्षापल्लवेनु संध्येयं शालं निर्जैके
न तथैव चक्रे चित्रेपटे वाप्यजनेन भूमौ मोहाद्वसोस्थंडिलगे यजेस्त्र भूमे त्रिवर्गादपि सिद्ध
मंत्रः सालिग्रामे मनोयंत्रे मंडले प्रतिमासु च नित्यं पूजा हरेः कार्या न तु केवलभूतले
भूनिवेषस्तु मंडलातिरिक्तभूमिपरः यंत्रस्थापनप्रकारमाह आदौ लिखेद्यंत्रराजं नतन्नक
ल्पोक्तलक्षणम् सौवर्णे राजते ताम्रे पीठे भूर्जे पटे भुवि विना यंत्रेण चेत्पूजा देवता न प्रसीद
ति दुःखं निर्यंत्रणा यंत्रमित्याहुस्तंत्रवेदिनः इति कुर्याद्यंत्रमिति वचनाद्यंत्रस्थापनप्रकारमाह
पीठे श्रेष्ठमंडपादिनिर्मिते अनुक्रमकल्प्ययंत्रकरणमाह वृत्तमष्टदलं सकेसरं तु विलिखेत्समद
लाष्टकसमन्वितम् षट्कोणकर्णिकं तत्र वेदद्वारोपशोभितं इति पंचायतनपदे देवस्था
पननियमाह शंभौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरो भास्वन्नागसुता रवौ गणपतौ शा

40A

80 ज्जोविकास्थापिताः देव्यो विसुहरैकदंतरवयोलंबोदरेजेस्वेरु नार्याःशंकरभागतोति
शुभदाव्यस्तास्तुहरानिष्प्रभाः शंकरभागतः ईशानादिनः तथाचोक्तंसमयोक्तमातृकायां
एवंसूर्यप्रपूजायद्दक्षिणेगणनायकम् ईश्वरंपश्चिमेदेशेउत्तरेविसुमर्चयेत् तस्मात्स्वकच
तुर्दिशिक्रमवशान्निर्मायचक्रंशुभम् ध्येहस्तिमुखंपरंस्मरन्हरंगोपालमेवंतथा ध्यानाराध्य
ततोबहुविधैःपुष्पैश्चपद्मादिभिर्नानाविधैःसुगंधिमोदकपालैरुद्वासयेन्महीं हृदि तथाचस्ना
नमालायां भवानीतुर्यदामध्येपशाम्भोसार्थकंयजेत् आग्नेयांपर्वतीनाथं नैऋत्यांगण॰
नाथं प्रद्योतनंतुवायव्यामाचार्यस्तुप्रपूजयेत् आत्मनःपुरतोभद्रेदेवतःपुरतःस्थितः
पूजाधावल्पनामैषाम्सर्वदेवार्चनेमतः इतिदक्षिणामूर्तिसंहितायां देवास्त्वसाचाप्यग्रेप्रा
चीप्रोक्ताशुरुक्रमैरिति उत्तराभिमुखोदेवियदाचक्रंसमर्चयेत् उत्तरास्यतदादेविपूर्वा
शैवनसंशयः ईशानकोणंदेवेशितदाग्नेयंनसंशयः पश्चिमाभिमुखोमंत्रीतदाचक्रंसम॰
मुद्धरेत् पश्चिमाशान्तदादेव्यापूर्वाशैवनसंशयः वायुकोणतदाज्ञेयमीशानंराक्षसंभवे
त् दक्षिणाभिमुखोमंत्रीयदाचक्रंसमुद्धरेत् पूर्वाशैवतदासादिग्रक्षःकोणंतुवह्निमत्
अस्यार्थः विसुशिवदुर्गागणेशसूर्याणांमध्येयाइष्टदेवतातांसंमध्येपूजनीया तद्भिन्नच

५१

आ. ४१ तुष्टयमीशानादिकोणचतुष्टयेषु पूजनीयं शंभोमध्यमतो हरिः सूर्यः गणेशः दुर्गा मतिपूजा
क. नीया विष्वादिष्वपि बाह्ये पीठस्यान्तरस्य गुरुः पंक्तिः पूजनीया गुरुं परमगुरु
परमेष्ठिगुरु परापरगुरवः पीठशक्तयः आधारशक्त्यादिज्ञानात्मनानाः पूज्याः पूर्वादिकेस
रेषु मध्ये च तत्तत्कल्पोक्तपीठशक्तीः संपूज्याः मध्ये पीठमन्त्रयजेदिति पूर्वादिदिक् नियम
स्तु पूज्यपूजकयोर्मध्ये प्राचीति कथ्यते बुधैः तद्दक्षिणं दक्षिणस्या उत्तरं चोत्तरे मनं पृष्ठं
तु पश्चिमं ज्ञेयं सर्वत्रैवं प्रपूजयेत् इति पूर्णायमोरुजयेदित्यनुष्टुबो मूलेन मूर्त्तिं संकल्प्य ध्यात्वा
देवं यथाविधि सावाह्य पूजयेत्तस्मान्मंत्रेण मंत्रस्य देवतानाम् मूर्त्तिं संकल्प्य पीठोपरि स्थापयित्वा
कल्पद्रुमच्छायायाः संस्थितां मूर्त्तिं ध्यात्वा मूलस्तु च्चार्यामुकमूर्त्तये नमः इति पूजयेत् मू
लेन मूर्त्तिं मिश्राः संच्छायायां कल्पशाखिनोऽमिति वचनात् आवाहनप्रकारस्तु शारदायां मू
लाधारे स्फुरद्दीपशिखाकाराणि वाससेत् शारदायां च मूलमंत्रं समुच्चार्य सुषुम्नावर्त्म
नात्तयोः अनीततेजसस्त्वस्यानान्नासिकारंध्रनिर्गतम् करस्थ मातृकांभोजे चेत समपुष्पसं
चये संयोज्य ब्रह्मरंध्रेण मन्त्री मावाहयेत्सुधी मातृकांभोजसद्रूपं तु शारदायां व्योमांदोर ४१
समागणीकर्णमिस्तादिद्र पंकरस्य पुष्पानिचये विभाव्य मन्त्रीमारोपयेत् आवाह्य संस्थापनेस

41A

82 त्रिधानमस्त्रिरोधमनेनतं सकलीकरणं पश्चाद्धृदयादवगुंठनम् अमृतीकरणं पश्चात् कुर्वी
त परमीकृतिम् क्रमादेतानि कुर्वीत समुद्राभिस्समाहितः आवाहनादि रूपं सिद्धांतसम्मे
अनयवामिरुणिस्समन्नस्य वाचेनादिषु स देवे सम्मुखीभावमाह्वानमितीरितं शिवस्यावाहित
स्यास्य वियादे हृत्संततम् स्थिरीकरणमुद्दिष्टं स्थापनं भक्तिरर्चनम् रजोपसृष्टमनायोग्य
हीनानवग्रहात्मिकम् कर्तुं सामर्थ्यमनसोह तत्स्थानिध्यंमुच्यते आसमाप्तेस्तु पूजायां सान्निध्यं।
हि शिवस्य यत् समस्त्रिरोध उद्दिष्टो विभोरव्यक्तिभक्तितः आनंदायतनेनत्र्य संसिद्विदानंदलक्ष
णम् तदत्र सकलेव्याप्त ध्येयस्यादवगुंठनम् अविभिन्नस्वभावानां यदभिन्नप्रयोजनं अंगिना
मंगिनां सार्ध्यं ममृतीकरणं विदम् त्वमातस्याप्यराधानं विज्ञेया परमीकृतिः सोमशंभुनाप्येतं।
देवोक्तं एवं स्वरूपमावाहनादि विधेयं अथोपचारां कुर्वीत मंत्रविन्मंत्रदेशितान् प्रयोजनेय
द्देवेनार्ये उपचारांस्तु षोडश आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकं मधुपर्काचमस्नानव
सनाभरणानि च सगंधि पुष्पं मनोदीपधूपनैवेद्यवंदनम् अर्चायाः पंचपंचैव गोधायाइति भेदतः
तथादिभिर्निवेद्यांताश्च जापंचोपचारिका पंचोपचारमादौ तांबूलावश्यकं तथा व्यवहारस्तु भ्रम
मूलकं एव तुर्लभे हृपचारे पृथक्कल्पनं वाहच उपचारेषु सर्वेषु यत्किंचिद्दुर्लभं भवेत् तन्नर्त्।

४२ श्री कृ 42 83

ममसान्निध्यार्थं पुष्पाद्येण पूजयेत् तत्र तत्र जलेन दद्यात् षोडशोपचारान्तरान्तरे देवतायाः शिरस्कु
यांकुसुमोपरि हस्तेन सदा पूजाकाले देवतायानोपरि भ्रामयेत्करं इति पूजाप्रदीपः पुष्पदा
ने विशेषमाह पुष्पं वा यदि वा पत्रं वा न दद्यादधोमुखं दुःखदं तत्समाख्यातं यथोत्प
न्नं तथार्पणम् पुष्पं विसर्जयेद्देवि मुद्रया तानमुद्रया अंगुष्ठतर्जनीयोगात्तानमुद्रेय
मीरिता तर्पणानि पुनः कुर्यात्त्रिवारं तत्त्वमुद्रया अंगुष्ठानामिकाभ्यां तु तत्त्वमुद्रेयमीरिता
इति हृद्दीहस्यहेतो अथोमुखफलेनेष्टं पुष्पांजलिविधानतः इति वचनादंजलिदा
ने नियमो नास्ति उपचारविधिं वक्ष्ये दत्त्वा चार्घ्यं शुभासनम् स्वागतं कुशलं प्रश्नं निगदेद
यतो गुरोः पाद्यं पादांबुजे दद्यात् हृद्ग्रहं हृदयाणुना हृदयमनुना नम इति मंत्रेण तथा मंत्र
णावदने दद्यादाचमनीयकं तथा मंत्रः स्वधेति रूपं अर्घ्यं दिशेज्जनो मूर्ध्नि शिरोमंत्रेण दे
शिकः शिरोमंत्रः स्वाहेति मंत्रः तथाणुना ततः कुर्यान्मधुपर्कं मुखांबुजे अणुमंत्रः स्वधा ४२
णुः स्वमित्यमंत्रः इत्यर्थः तेनैवमनुना कुर्याद्द्विराचमनीयकं तेनैव स्वधामनुनैव अर्घ्यं
दत्त्वा वा पाद्यं दद्यात् तदाह क्रमदीपिकायां दत्त्वासनं स्वागतमित्युदीर्य तथार्घ्यपाद्याचम
नीयकानि देयानीत्यादिश्रवणात् इच्छाविकल्प इति भावः आचमनं वारत्रयं देयं तदुक्तं

42A

84 पूर्णायागे स्वधेत्याचमनीयं हि त्रिवारं मुखपंकजे मकयेपरिपुष्पं च वैषडित्यर्पयेत्सुधीः
इति पूर्णायागवचनात् वैषडिति पुष्पदानमिति कृते: वस्तुतो वैषडिति नमः मंत्रः
केचित्तु स्वधार्चाद्दिदाने षयितथा तत्क्रमपाषांडकुशे नमः स्वधा च स्वाहा च वैषडिति य
थाक्रमात् हृत्तरस्तरमृष्याद्यर्घपाद्यादीनि प्रकल्पयेत् इति तथार्घं नमोनमइति इति द्विम
मंत्रः केचित्तु स्वधा मंत्रेण वदन इत्विचने स्वधेति पाद्यं कल्पयति तच्छिंत्य गंधादिभिः
कारयेत्स्नानं वाससी परिधापयेत् दद्याद्दिव्योपवीतं च हाराद्याभरणैस्सह अभ्यर्च देवो
गंधाद्यैरंगादीनर्चयेत्ततः अंगादीनाचेयं देवताशरीरे तथा चतुष्कारदस्या दीपादिदाना
नंतरमुक्तं यथा अंगादिलोकपालांतं यस्तेदावरणान्यपि अनंतरमूले पुष्पांजलित्रयं द
त्वा प्रागिव पुष्पांजलिं पंचकमिति प्रदीपः ततः पुष्पांजलिं परिवारार्चनं च वैदिति राघ
वभट्टः इति नैकवचनं कृते: संख्यायास्साधकाभावादिति अथावरणपूजा तत्र केस
रेष्वग्निकोणादिहृदयादीनि प्रपूजयेत् नेत्रं मध्ये दिक्षास्त्रं तद्ध्यानं त्वाङ्गदेवताः तु
षारस्फटिकाश्यामनीलकृष्णारुणार्चिषा ददाभ्यचारिण्याः प्रधानतनवः स्त्रियः
एवेव अंगीर्णाभरयापूनां दिव्यवस्त्राद्युपक्रमात् इति शंभुवचनं शिवपूजाविषयमि

43

श्री० 85 तिरश्चाप्रदीपः केसरेषु स्थानविशेषानुपदेषु कल्पेषु उपदेशो न तु तत्रैवांगपूजा प्रणवादि
क चतुर्थ्यंतनमंगानां नामो ज्ञानमेभिर्मेन पूजयेत् यथा ॐ हृदयाय नमः ॐ शिरसे स्वाहेति के
चित् कश्चित् ॐ ह्रां हृदयाय नमः ॐ ह्रीं शिरसे स्वाहा षड्दीर्घभाजा बीजेन स्वनाम्ना हृदया
नतनव इति मुख्यदेवताया आवरणीभूतः स्वार्थः पश्चादर्चनीयाः सुकल्पाकः सनतयः क
मात् अनेनेय जेल्लोकपालानश्चैवाविष्टानितां इंद्रमग्निं यमं रक्षो वरुणं पवनं विधुम् ईशा
नं पन्नगाधीपं भमथ ऊर्ध्वे पितामहं रक्षोनिरतिः अथो निरतिं वरुणं यो मंत्रोज्ज्ञात्वाधि
प्रतिमा व प्रधाननिर्देशात्साधियत्वायैतानि स्वयोपलभ्यते तथास्त्राधिपतये इंद्राय न
मः इति केचित् चंद्रिकायां च पत्राधीश्वरवर्णाम्नायपरिवाराप्रसंगनान् इंद्रादीन् चेयेदि
मु अंगे पत्रे वाहनं कनककपिलनीलधूम्रश्वेतधूम्रमलक्षितं शुचिरक्तावर्णानी वासवा
द्याः एषां वाहनान्याह ऐरावतस्तथा मेषो महिषः प्रेतसंज्ञकः मकरो व्योम्नः पश्चाद्वा ४३
तो द्वौ वृषभस्तथा हंसो हंसः क्रमादेषां वाहनानि विदुर्बुधाः क्वचिदनंतरस्य रथो वाहन
मुक्तः स्वरूपमाह अथ चक्रिको सतवि शुक्लाभमभिच्छगलगनशक्तिं पुंडरीकं समम् मणिमयमकु
टं यजेत्स्वगंधैः कुसुमवरैस्तैर्वांऽकुंडलेच इति सारसमुच्चयवचनस्य छगलपदस्य छगले।

43A

86 मेषइतिटीकाकारः एवंसत्योच भगोथरजनकपादप्रायश्चित्तमीषीशाने देवानांयोमुखं
हव्यवाहनस्सर्वशक्तिः तस्यांतंवाहनंशब्दपदेवेशेन्द्रैर्महर्षिभिः इत्यादिमंत्रमुक्तवान् प्र
सिद्धत्वाच्चतुर्णामांगलवाहनत्वेनस्तजामंत्रमाह तथाचपूर्णायामे इंद्रायवज्रहस्तायसुरा
धिपतयेएवम् सवाहनायपदंयस्त्रान्तपरिवारायेत्यपि नमोंतेचैवमन्येषांवाहनादिकम
हूहेन अन्येषामग्न्यादीनांवाहनादिकमित्यादिनाप्त्वनामास्त्राधिपतयपरिग्रहस्तुचिंता मे
त्रायथा इंद्रायवज्रहस्तायसुराधिपतयेसवाहनायसपरिवारायनमः इतिमंत्रः स्तजाया
स्वाग्न्यादीनामप्यमंत्रोबोद्धव्यः केचित्तुध्यानरक्तवर्णरसात्मांगायत्र्यादिबुधायेत्यादिप्रका
रेणवियोजयंति पीतादिवर्णायेत्यपिकश्चित् एषामस्त्राण्याह दंभोलिशक्तिमिथदंडख
पाशपाशध्वजांकुशगदात्रिशिखरायुधाः अर्चाबहिर्निजस्थलवेहितमौलिमुक्तास्सा
साग्रुधाभयसमन्वयपाणिविधाः दंभोलिवज्रः कृपाणःखड्गः त्रिशिखोत्रिशूलं एषां
यथासंख्येनान्वयः निजस्थलदेहितमौलिमुक्ताः निजस्थकिरीटनिर्मितस्वस्वनामस्वायुध
चिह्नाइत्यर्थः स्वास्वायुधेतिस्वस्वमायुधमितिअर्थः तेनवज्रस्यहस्ते वज्रमेवायुधमभयंचेति
भावः केषांचिन्मतेवायुर्ध्वजहस्तः तद्यंत्रपूर्णायामे वायवेध्वजहस्तायप्राणाधिपतयेनमः

प्रा॰ 87 इति शारदायां यस्मात् देवं वदंति प्राक्तिगे देवी शुपे अन्तो बहुरेविडः श्रंजनीयः स विडम्बरदि
क॰ कश्ज्ञाः अभ्यर्च्य देवं गंधाद्यैर्वंगादी स्वनम्येन ततः इति शारदातिलकवचनात् आदिपदस्व
स्य धूपदीपपरिग्रहः ततप्रकारमाह अगुरुग्गुलुशर्करामधुचंदनैः धूपयेदाज्य
सम्मिश्रैर्नीचैर्देवस्य देशिकः इति शारदायां ग्रंथांतरे विशेषः अंगारे चंदनविलसितैर्गन्धसुवि
कीर्णैर्गुग्गुलैः सैकेनपविमलैर्धूपमासाद्य मेत्री दद्यान्नीचैर्दनुजमथनायाय घंटाघोषा
द्यैर्वाद्यानस्तु समैर्वाचितोवादनायः ततो दीपं सप्रभिर्वौ ततं सिक्तकर्पूरसूत्रादीस
दृष्टाप्रतिविवदधीः पश्चाद्धूपमन्त्रैः कृत्वा वर्त्तास्तु तिमघ्यविधायार्पयित्वा पाद्यमर्घ्यं
कल्पयेत्तु विपुलं सर्वाणि पात्रेनिवेद्यम् नीचैर्देवस्यार्थः कृत्वा स्नानमित्यर्थः अपरेणवामक
रेण घंटां वादयानः इति श्रवणात् धूपदीपदाने पिन स्नानमेवपश्चकमिति भावः पश्चा
धूतमल्लकस्य पात्रपर्यंतं उदैरूरुदर्शनादीपस्यार्थः चक्षुरोपलक्षणं तथा च स्मा ५५
कं शरगार्भिण्यसर्पिषा तिलजेन वा आरोप्य दर्शयेद्दीपानु चैस्तारभशालिनः इति श्रव
णात् तैलसाध्वभिधानात् नैवेद्यदानमाह नैवेद्यं पुरतः कृत्वा चक्षुर्ब्रह्मप्रोक्ष्य ॐकारेन
जपति मुद्रां दर्शयेत् तथा चोक्तं संस्थाप्य पुरतः प्रोक्ष्य तारेण समनोम्नसेत् इति प्रतिपत्तिस्का

44A

४४ रमाहृ वीतिह्लोद्वदर्पितांनमुस्थ्वन्मूलमत्रमथनिक्षिपेज्जलम् अर्पयेत्तदमृतान्मकं
हविर्दीपुजाचकुस्तमंसमुद्रेण निवेदयामिभवतेजुषाणेदंहविसुरे नैवेद्यार्पणमंत्रो
ऽयंसर्वांचामुनिज्ञान्वयानमदेवतानान्नानथाचरस्याऽग्निभावः अमृतोपस्तरणमसिस्वा
हेत्याचमेत्ततः ग्रासमुद्रांवामदोस्नाविकलोत्पलसन्निभां प्रदर्शयेद्दक्षिणेनप्राणादीनां
चदर्शयेत् प्राणापानव्यानोदानसमानाकुमास्व तुर्थ्यायुक्ताः उग्रावरणीयाकमपाणवह्नि
जायायुतस्तथा पानीयममृतीकृत्यमुद्रयाधेनुसंज्ञया त्रुलकोदकममृतापिधानमसि
वहयम् अनेनदेवताहस्तेदत्वाचापोविचिंतयेत् आचातास्तुनराचमनीयमर्पितोद्य
तादिसंदीप्तांविष्टकादिविनिर्मितान् पराव्रतभ्रमाकारानुच्चैर्दीपप्रदर्शयेत् आरात्रिक
मिदंप्रोक्तंचघंटावादनपूर्वकम् गतसारेतुनैवेद्यनतस्त्रैतस्तमुद्रेण ऐशान्यानत्तुजेदत्वा
किंचित्स्थानविशोधयेत् तद्भुजेदेवतोच्छिष्टभजेस्थानमविशोधयेत् उच्छिष्टभोजनेदा
तुनेच विष्वक्सेनेस्मृतोविष्णोस्तजश्चंडोशिवस्वतः चंडीश्वरीतथाशक्तौ चंडेशः
करस्यच लंभोदरोगणापतिरमीत्युच्छिष्टभोजनाः तांबूलकमभिसमर्प्यस्तुवादगीत
नृत्तैस्तुत्प्रसमभिपूजिताखेस्वगंधादिभिस्तत्परिवारस्यधाद्यमस्त्रेदत्वाविधायकुह

45

श्री· 89 मंत्रांजलिमादद्देण स्तुत्वा प्रणम्य शिरसा चुलकोदकेन आत्मानमर्पयेत् तत्र स्वेणाङ्कमले ततः
क· पूर्वप्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्त्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां
पद्भ्यां उदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं च सकल
हरये समर्पये पुनः पूजां गंधादिभिर्दीपांतेनैव तथा चोक्तं आगमकल्पद्रुमे चंदनादिप्र
दीपांतैरुपचारैः पुनर्यजेत इति शामदायांतु पंचोपचारैर्विष्णुं कं गंधादयो निवेद्यांता पू
जा पंचोपचारिकेति प्रसन्नार्चे यमाख्याता सर्वदेवप्रसादिनी यथाशक्ति जपं कृत्वा तेन ज
पं सर्वसंपदे दक्षिणे देवहस्ते तु अर्पयेत् स्ववत्सुधीः अर्पणमंत्रस्तु गुह्यातिगुह्येत्यादिरूपः
यथाशक्तीति अष्टोत्तरसहस्रं वा अष्टोत्तरशतं वा दशवारं वा तदक्षरणापदुनौ संख्यानुक्ता
प्रातेसाष्टसहस्रं वा जपादिषु इति पुष्पांजलिं पुनर्दत्त्वा साष्टांगं प्रणमेन्मुकुंदं तथा चोक्तं वि
ष्णुकल्पलतायां दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा मनसा वचसा चेति प्रणामो
ष्टांग ईरितः बाहुभ्यामपि जानुभ्यां वचसा शिरसा दृशा पंचांगकः प्रणामः स्यात् पूजासु प्रव ४५
राविमौ अष्टांगं नमः प्रोक्तः पंचांगो मध्यमः स्मृतः तदेवं दृष्टतोक्तं नारायणां मंक्षा चिदाचवे
न पंचकृत्वा तु योदेवं भ्रमितत्प्रणमेत्पुनः तस्मै हि किं फलं नास्ति न पर त्र ह्यात्मनः स्याता॥

USA

90 भोगाश्च मनुष्याणां यः स्नां प्रणमेन्नरः अष्टांगप्रतिपातेन मुक्तिस्तस्य करे स्थिता परिवारसमं
सर्वमनुपसंहारमुद्रया उन्मनाबुपसंहृत्य देवतां प्रेतमानसः दमस्वेति विसृज्याथ मंत्रेणाव्याप्
कविशः विधाय देवतां पश्चादात्मीये हृत्सरसीरुहे सुषुम्नावर्त्मना पुष्पमाघ्राय योद्वासयेत्सुधीः
एवं च निर्माल्यं शिरसा धार्यं सर्वांगेष्वनुलेपनम् नैवेद्यं चापि भुंजेत तदन्नान ज्ञानिशालिनी न
तोयेरान्नमस्करः एवं च देवार्चनावशिष्टं यत्सलिलं शंखमध्यगम् अंगेषु गृहेमनुष्याणां ब्रह्मह
त्यादिकं पापं हरति एतान्यन्यानि पूजायां साधनानि बहून्यपि उत्तमानि च मध्यानि न्यूनानि विवि
विधानि वै स्वस्थः समर्थः कुर्वीत न्यूनैरैव साधनैः मध्यमो मध्यमैरेव न्यूनो न्यूनैश्च साधनैः
आपद्यपि समर्थोऽपि न्यूनैरपि समर्चयेत् यथाशक्ति यथान्यायं यथालोकाविगर्हितं पूजां वि
स्मरतः कर्तुं यो न शक्नोति मानवः स हृदंबुजध्याये पूजये यदिष्टदेवतां अथवा देवतामंत्र
ध्यात्वा मनसा कल्पपूजयेत् अथवा मानसीं कुर्यादात्मपूजामथापि वा अथवा वलापूजां
वाप्यां कुर्याद्विचक्षणः अर्चान्मात्रे समर्थश्चेद् यद्वा ऽर्चनसाधने संपूज्यैव जपं कुर्यान्मंत्रे
वलं जपेत् इत्यवचनात्पूजायां अवश्यकत्वमिति प्रदीपः तस्मिन्नेव पूजानुनिर्जने कुर्यान्न का
र्यां जनसन्निधौ कदाचिद्दृष्टहानिस्तु न च व्याप्तिः कदाचन वा पूजापरिमज्जान प्रकाशनं कद

५६

श्री: ९१ चनेति कुलचूडामणिवचनविरोधात् वस्तुतोधिकारिनियंत्रितमिति ध्येयम् अथेदानीं
क: चण्डजायामुक्तंयदिहितं तथा निषिद्धं वापितत्सर्वं मुख्येनग्रंथचर्ययैव तत्रोक्तंयामलेनाद्
मैरर्चयेद्विस्तुनतुलस्याविनायकं नदूर्वायार्चयेद्गौरीं बिल्वपत्रैर्दिवाकरं उन्मत्तमर्कपुष्पं च
विस्मर्वर्जयेत्सदाबुधैः एवं च गंधपुष्पादितत्तयवकृष्णातिलसर्षपैः सामान्यं सर्वदेवानाम
वीर्यपरिकीर्तितः इत्यादिनाप्राप्तस्यार्चनदानस्यनिषेधमितिभावः गौतमीये नरकं
जातुगस्तुलिर्यार्चेदनंरक्तपुष्पकं बिल्वपत्रैः प्रसूनैर्वानार्चयेद्देवकीसुतं शेषांतरे देवी
नार्कमंदारमादित्यैतनारंतथा गणेशायचसूर्यायरक्तपुष्पमतिप्रभं निषिद्धान्याह शि
वेकुंदमदंतीचयूथीबंधूककेतकं जपारक्ताञ्जिमैश्चमालतीरक्तचंदनौ रक्तवर्णं हया
दि च वर्वरां परिवर्जयेत् तथाशुष्कैस्तुनार्चयेद्बिल्वपत्रैःपुष्पैःफलैरपि स्नानानीतैःपर्यु
षितैर्याचितैः क्रमवर्णाके स्नानानीतामथाहुः स्नानेनायमानीतैरितिसंप्रदायः स्वयंविक ५६
सितंपुष्पंस्वयंचपतितंभुवि वर्जयेद्धस्तनीतंपुष्पं प्रोगंधं च विशेषतः स्वयंविकसितंस्वयंहा
सेनविकसितमित्यर्थः तथा कलिकादीनत्याज्यं विनाचंपकपंकजे तथा त्रिपत्रान्यून
कुसुमैर्नार्चयेत्कदाचनभूगतं चापसंस्पृष्टं केशकीटादिदूषितं कुसुमं पाटलं चैवशारीषं

92 संयोज्याङ्कुंचयेत्किंचिन्मुद्रैषांकुशसंज्ञका वामाङ्गुष्ठं तु बध्नीयाद्दक्षिणेन तु मुष्टिना
ऊर्ध्वमुत्तानतो मुष्टिमंगुष्ठं तु प्रसारयेत् वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः
दक्षिणांगुष्ठसंश्लिष्टा मुद्रैषा ध्वजसंज्ञका मिथः कनिष्ठके बद्ध्वा तर्जनीभ्यामनामिके
अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरथः अंगुष्ठाग्रद्वयं न्यस्येद्योनिमुद्रेयमीरिता अ-
न्योन्याभिमुखाश्लिष्टकनिष्ठानामिके पुनः तथैव तर्जनीमध्या धेनुमुद्रा समीरिता अथोर्ध्व
विदर्शितहस्ते तादृशे वामहस्तकं धारयेत्स्थापनमुद्रेयमर्चने स्थापने मता हस्ताभ्यामञ्जलिं
बद्ध्वानामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहने मता आवाहने समाख्याता
मुद्रा देशिकसत्तमैरिति वचनात् अधोमुखी त्वियं चेत्स्यात्स्थापिनी मुद्रिका भवेत् उत्थिता
गुष्ठमुष्ट्योस्तु संयोगात्सन्निधापिनी अंतःप्रवेशितांगुष्ठा सैव संरोधिनी मता उत्तानमुष्टि
युगला संमुखीकरणी मता देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः तथा च षडंगन्या
सैव सकलीकरणमुद्रेति नात्यर्थं अन्यथा मुद्राप्रकरणे तस्य रूपाभिधानमर्थान्तरं स्यात्
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयमभितो भ्रामिता सती अन्यो
न्याभिमुखमध्यादिना धेनुमुद्रा उक्ता अमृतीकरणं कुर्यात्तथा साधकसत्तमः अन्योन्यग्रथि

47

श्री· 93 ताङ्गुष्ठाप्रसारितकराङ्गुलिः महामुद्रेयमुदिता परमीकरणे बुधैः प्रयोजयेदिमां मुद्रां दे
क· वतावाहनकर्मणि अथ कृतोदत्तहस्तः प्रसृतोभयमुष्टिका हस्तौ तु सम्मुखौ कृत्वा संलग्नौ
संप्रसारितौ कनिष्ठाङ्गुष्ठकौ सक्तौ मुद्रैषा चक्रसंज्ञका स्पृशेत् कनिष्ठोपकनिष्ठिके द्वे संग
ष्ठमूर्ध्नि प्रथमे हृन्मुद्रा तथापरा तर्जनीमध्यमे स्यादनामिकामध्यके च मध्या अनामिकात
र्जनीमध्यमा मा स्यात् हृच्चतुर्थी सकनिष्ठिकास्ताः स्यात्पञ्चमी मध्यमतः प्रदिष्टा प्राणादिमुद्रा
नि तन्मंत्रयुक्ताः अथो मुखं वामहस्तेन मूर्धासंस्थाद्दक्षहस्तकं दिशाङ्गुलीभिस्स्पृश्य परिवर्त
येत् एषा संहारमुद्रा स्याद्विसर्जनविधौ मता वश्ये हस्तमयचाराणां मुद्रा मेत्रेषु दर्शिताः
प्रसादयेद्बौ हस्तौ विद्वेषे विनियोजितौ अङ्गुल्याविद्ध ततः कार्या मध्येङ्गुष्ठौ तु विन्यसेत् देवस्था
ने विन्यासे पद्ममुद्रां प्रदर्शयेत् ईषन्नम्राङ्गुलिर्दत्त्वा संयोज्याङ्गुष्ठकं वरं स्वागतं स्वस्तिकाम
द्रा मध्यामूलग्नाङ्गुलिः उपचारे स्वागते तु प्रयोक्तव्या विपश्चिता वह्निमुद्रा हि हस्तातु मु
द्रा वह्नेः प्रकीर्तिता तौ च प्रसारितौ हस्तौ पाद्यमुद्रा प्रकीर्तिता देशिनी मूलगाङ्गुष्ठाद्दिशा
यः कनीयसी प्रसार्या मध्यमा नित्या मुद्रा मीचप्रकीर्तिता संयुक्तानामिकाङ्गुष्ठौ तिस्रो न्या
तु प्रसारिता मधुपर्के तु सा मुद्रा संकल्पाकलशं के कृत्वा मुष्टिं तथा हस्तान् मध्यमाङ्गुष्ठकौ ५८

47A

94 परिवर्जयेत् भ्रमतेव जयेत्सुबंधे शेफालिबकुलं विना छिन्नभिन्नैर्दोषाभावमाह बिल्वस्य
खदिरस्यैव तथा धात्रीदलस्य च तमालस्य च पद्मस्य छिन्नभिन्ने न दूषणमिति तथा नंदतंत्रा
त्सावित्र्यादाहृतमस्य तत् केतुपुष्पं श्रेष्ठं रक्तकोकनदं तथा कंजागनपत्रकं बर्बराद्वितयं चैव क
र्णिकारद्वयं तथा बकुलं मंदारचूतानि करवीराणि शस्यते मालिका त्रितयं जाती दोषमपु
ष्पं जयंतिका बिल्वपुष्पं कुरवकं मुनिपुष्पं च केसरम् वसंती द्वितयं चैव काशपुष्पमरु
वकं दमनं च लवंगं च सूर्यांघ्रिशेफालिका तथा सुगंधिकैश्च नीलोत्पलैः कुसुमैरर्चयेद्दलैः
तथा दूर्वा हि पूजा सदा कार्या जलस्थलजैरपि विहितैरविहितैर्वापि भक्तियुक्तेन चेतसा
गंधवद्भिरपि सर्वैः पुष्पैः सदाऽर्ज्जा विहिताविहितैरपि कर्तव्या सर्वदेवानां भक्तियोगकारणे
इति तथा चोक्तं भविष्ये अलाभेन तु पुष्पाणां मंत्राण्यपि निवेदयेत् पत्राणामप्यलाभेन
फलान्यपि निवेदयेत् फलानामप्यलाभे तु तृणगुल्मौषधीरपि औषधीनामलाभे तु जलमा
त्रं निवेदयेत् जलाभावे तु भावेन भक्त्या संपूजितो भवेत् इति एतद्वचनद्वयमभावविषयं तन्म
क्तिविषयं तथा च कालीतंत्रे अपामार्गैस्तु भृंगैस्तु सुगंधैश्चैव नीलोत्पलैरिति अप्यन्यत्रोक्तो
रवभयान्न लिखितमिति संक्षेपः इति श्रीयदुनाथविरचितायामागमकल्पलतिकायां सप्तमः प
टलः ७ अथ संक्षेपतः सर्वदेवानां नित्यपूजा तदुक्तं यामले आदौ स्वस्थ्यादिभिर्न्यासः करस्थु

प्रा॰ 95 ङ्गिमतः परं अंगादिव्यापकौन्यासौ सृष्ट्यादिन्यासएव च तालत्रयं च दिग्बंधः प्राणायामस्ततः
क॰ परं ध्यानेष्टं जपश्चेतिसर्वं मंत्रेषुयं विधिः इत्यागमलेदेवतायाएव अथषडंगेषुमुद्राः सन
मुद्रालक्षणानि जानूर्वोरंतरे हस्तौ नाममध्यक पादतलेऽपि अज्जुकायोविशेषोस्मीत्स्तिं
कंतेउद्दीरितम् वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं पुनर्दक्षोरूपरि पश्चिमेन विधि
नाधृत्वा कराभ्यां दृढं अंगुष्ठे हृदये निधाय चिबुकं नासाग्रमालोकयेदेतद्ध्याधिविध्वा
नकाविपश्चिमेनोपन्यासने प्रोच्यते अथ मुद्राः प्रवक्ष्यामि सर्वतंत्रेषुगोपिताः याभिर्विरचि
ताभिस्तु मोदंते सर्वदेवताः दक्षिणांगुष्ठतर्जन्यामग्रलग्नेपरांगुली प्रसार्य संयतो ज्ञाना
एव व्याख्यानमुद्रिका दक्षांगुष्ठं परांगुष्ठेहिप्रसाहस्तद्वयेन तु सावकाशममेकमुष्टिं कु
र्यात्साकुंभमुद्रिका अथोंगुष्ठाग्रवत्तु मुष्टिः शिखायां करद्वंद्वांगुष्ठयोर्वमेणीः सुः नाराच
मुष्ट्युत्तानौ बाहुयुग्मकं अंगुष्ठतर्जन्युदितेपुनिश्चितम् विष्व मुद्राकथितास्तुमुद्रायंत्रा
दक्षिणेतर्जनीमध्यमेस्तः नेत्रद्वयं यत्र भेदनामाषडंगमुद्राकथितायथावत् अंगुल्याध्मा
नमुद्रास्याद्धास्तुदेवाभिधा च सा कनिष्ठांगुलकौमुद्रौ करयोरितरेतरम् अर्त्तनीम
ध्यमानामासेहृतांभुग्नवर्जिता मद्रेषाभगालिनी प्रोक्ता शेवषयोपरिचालिता इति शेवषयो
परिचालितासनीभालिन्याख्यांलभते इत्यर्थः ऋजवीं च मध्यमां कृत्वा तर्जनीमध्यपर्वणि

48A

96 मत्तौ अन्याः प्रसारिताश्लिष्टा मुद्रा वस्त्रस्य कीर्त्तिता कनिष्ठांगुष्ठकौ लग्नौ तिस्रोऽन्याः प्र
सारिताः यज्ञोपवीतमुद्रेयं कथिता मंत्रपारगैः मध्यपर्वसमन्तानामुद्रालंकारणीम
ता मुक्तानिर्नामिका मुष्टिर्गंधमुद्रेति कीर्त्तिता उत्थिताधोमुखी मध्या बद्धांगुष्ठप्र
देशिता पुष्पमुद्रा तया ख्याता पुष्पदानविवर्धिनी अंगुष्ठतर्जनीलग्नाश्लिष्टाः संकुचि
ताः पराः मुद्रा धूपप्रदाने स्याद्देवानां तुष्टिकारिणी उत्तानाधोमुखी मुद्रा दीपमुद्रे
ति गीयते पंचांगुल्या ग्रसंयुक्ता प्रोत्थिता ऊर्ध्वमुखी यदि त्रियानिबद्धा मुद्रेयं नैवेद्यस्य
प्रकीर्त्तिता मध्यमानामिकांगुष्ठाः संलग्नाग्राश्च धोमुखाः अन्याः प्रसारितांगुल्यो गोमु
खी सा प्रकीर्त्तिता त्यक्तप्रदेशिनी मुष्टिः सूचीमुद्रेति कीर्त्तिता रक्तामुद्रेति सैवाक्रासम
ताभ्रमने यदि द्वौ करौ पृष्ठसंलग्नौ ग्राग्रमध्ये न्युब्जितांगुलीः कोटिकेति समाख्याता प्र
णमेतां प्रदर्शयेत् देशिन्यंगुष्ठयोर्मध्ये दत्तांगुलिचतुष्टयं विधाय संपुटीकृत्वा लग्ना
गुष्ठौ समन्त्यतो कुंभमुद्रेयमीरामस्या हृल्लेखा काश्यपीमता प्रसार्य दक्षिणं हस्तं कनि
ष्ठाद्यास्त्रिसांगुलीः क्रमादाकुंचयेद्दीर्घं मुद्रा संहारिणी मता मिथः पृष्ठेः चितौ हस्तौ व
द्धाभ्यग्रथितांगुली कृत्वा बध्वा परा हृत्पनवासमाप्तं मापनी इति श्रीयडनाथ विरचि

ग्रा· 97 तायामागमकल्पलतिकायामष्टमः पटलः श्रेयसे ॐ पुरश्चर्यां प्रवक्ष्यामि मंत्राणां सिद्धि
क· दायिनीम् यस्या विज्ञानमात्रेण सर्वसिद्धीश्वरो भवेत् पुरश्चरणसंपन्नो मंत्रो हि फलदायकः
किं होमैः किं जपैश्चैव किं मंत्रन्यासविस्तरैः रहस्यानां च मंत्राणां यदि न स्यात्पुरस्क्रिया पुरस्क्रि
या हि मंत्राणां प्रधानं जीवमुच्यते जीवहीनो यथा देही सर्वकर्मसु वर्जितः पुरश्चरणहीनो
हि तथा मंत्रः प्रकीर्तितः तस्मादादौ पुरश्चर्यां कृत्वा साधकसत्तमः प्रयोगांस्तु ततः कुर्यात्स
र्वं साधकडलंभे लब्ध्वा तु सद्गुरोर्विद्यां पुरश्चर्यां समाचरेत् तथा च तारतम्यतंत्रे मंत्रं नी
त्वा गुरोः पार्श्वे गुरुभक्तिपरायणः मंत्रस्यानस्य हेतुं च प्राणानिवृत्ता यतात्मनः यद्वा स्वकील
कं ज्ञात्वा कुर्यान्मंत्रपुरस्क्रियां मंत्राणां प्रणवः स्यात्तु मस्वेरहः प्रकीर्तितः सेतवाश्च वदन्ती
ज्ञेया मंत्रवह्निर्वनंततं अतिरिक्तश्च पंचवर्णा हृदयं परिकीर्तितम् तथाच जपहोमतर्पणाभि
षेकब्राह्मणभोजनम् पंचांगोपासनं लोके पुरश्चरणमिष्यते यत्र जपहोमादौ संख्या नो।
क्ता तत्राष्टसहस्रसंख्या स्यात् तदन्नावाराहीतंत्रे येषां जपे च होमे च संख्या नोक्ता मनीषि ५९
भि तेषामष्टसहस्राणि संख्या स्याज्जपहोमयोः सहस्रमष्टोत्तरं तु कुर्यात्तत्त्वज्ञानाय प्रकीर्तिते
न इत्यत्र दलेपाठः यस्मिंश्च निगमे चैवं मंत्रसंख्या विधीयते तत्र संख्यत्र मंत्राणां संख्या

49A

98 स्वसिद्धिर्यथाक्रमं कल्यौ कृते च लक्षं तासंख्यो त्रेतायां द्विगुणं भवेत् द्वापरे त्रिगुणा संख्या कलौ सं
ख्या चतुर्गुणा तदन्ते हरणं यद्वत् तासंख्यानं केशतमाष्टसहस्रं वा दशांशपि वेति जपस्थानानि
आह तत्र च योगिनीहृदये पुण्यक्षेत्रे नदीतीरे गुहापर्वतमस्तके तीर्थप्रदेशाः सिंधूनां
संगमः पावनं स्मृतम् उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः तुलसीकानने गोष्ठे वृष
शून्ये शिवालये अश्वत्थामलकीमूले गोशालाजलमध्यतः देवतायतने कूले समु
द्रस्य निजे गृहे गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा प्रेतभूम्यादिकं चैव तत्तत्कल्पप्रद
र्शितम् दीपस्थाने समाश्रित्य कृते कर्म शुभावहम् चतुरस्रां भुवं कृत्वा कोष्ठानां नवकं
लिखेत् पूर्वादि कोष्ठे विलिखेत् सप्तवर्गाननुक्रमात् लक्ष्मीशो लवर्णानुक्रमान्मध्ये विलिखे
त्ततः दिक्षु पूर्वादितो यत्र स्वे ग्रामाख्या यदक्षरं स्मृतम् साधकस्यतु ज्ञानी याद्वस्ता वुभयतः
स्थितौ कोष्ठकद्वंद्वभेदाद्दोहे शिष्टे प्रयुक्तमीरितम् क्रमेण विभजेन्मध्यस्थमविभ्रामाथकः
सुखस्थाल भते सिद्धिं कस्थ्यः सत्यजीवनः उदासीनः कुदिक्स्थः पादस्थोऽङ्गः खमात्सुया
त पुरुषस्य पीड्यते मंत्री बंधनोच्चाटनादिभिः कूर्मचक्रमिदं प्रोक्तं मंत्राणां सिद्धिसाधनम्
अष्टादिकेष्वधिक्षिप्तो देवे तीर्थे प्रवाप्नुतः अग्रेऽपर्वते तीर्थे कूर्मचक्रं न चिंतयेत् अत्रातनाम

50

श्री॰ ११ वाह्योचनत्रनामप्रकल्पयेत् सप्तवर्गीति कचटतपाः पंचवर्गाः यरलवशषसहेति द्वौवर्गौ
कृ॰ एवं सप्तवर्गा भवंति लक्षमितिसत्स्वरूपं रेखोपेतागत्यादि दिलिखेदित्यर्थः मध्येमद्यमकोष्ठम
ध्यनिवथाहृता अकारादिद्वौद्वौस्वरौ लिखेत् मध्येमूलमंत्रं लिखेत् अथवान्यप्रकारेणपुरश्च
रणमिष्यते तदुक्तं वीरतंत्रे अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि कृष्णपक्षे विशेषेण साध
येद्वीरसाधनम् तत्सार्थं प्रहरे यामे गते च स्वरसुंदरि विवादा घोरशिवं वापिनी तथा तापयस्मत्स्वं
साधयत्स्वहृति नमंत्री मंत्रध्यानपरायणः भयं चैव न कर्तव्यं हास्यं तत्र विवर्जयेत् चतुर्दिक्षु नि
रीक्ष्य मंत्रमैतत्स्मरभ्यसेत् पूजा द्रव्ये प्रवक्ष्यामि नानातंत्रानुसारतः सामिषान्नं गुडं छागं मधुपा
यसपिष्टकम् नानापुष्पं च नैवेद्यं ससकल्पाक्रमसाधितम् वितस्थाने समानीय बंधुभिः श्रद्धा
पारिणिभिः समानशीलसंपन्नैः साधकानिर्भयः शुचिः तथा च योगिनीहृदये बल्यर्थं सामिषा
न्नं च पुडछागं मधुः पिष्टकं परमान्नं च पयो मूलं फलं तथा सप्तरात्रं बलिं दत्वा चतुष्पाते ५०
चतुर्दिक्षु पात्रत्रयं सदा स्वस्थापयेन्मनुना सदा स्वगुरुं भ्रातृवर्गं वा ब्राह्मणं वापि सद्ब्राह्मण
स्तद्दानपरित्यागं कियद्द्वे निवेशयेत् विनायालद्वर्णं वद्भ्यः सर्वसिद्धिप्रदायकम् तदुक्तं या
मलेतंत्रे असंस्कृतानानिनाग्राह्यानतु संस्कारसंस्कृता इति साधकं तु प्रवक्ष्यामि सर्वांकं भैरवेण

50A

100 नु महासाद्रुमिका स्त्रैव महाबलपराक्रमः दयालुः स्वच्छहृदयस्सर्वप्राणिहितेरतः एवंविध
गुणोपेतेनः कुर्याच्च विविसाधनम् संकल्पप्रथमं कुर्यात्स्वस्तिवाचनपूर्वकम् सामान्यार्घ्यविधा
यादौ ततः स्वोक्तसमारभेत वह्न्यालिकाभूवाधे भूविनः एवंविदिं मत्वाः संकल्पोयथा अद्येत्यादि
अमुकगोत्र अमुकदेवशर्माहं श्मशानसाधनमहं करिष्ये इति संकल्प अस्त्रान्तमूलमंत्रेणया
गभूमिं वप्रेणाध्ययेत मूलमंत्रेण फलंकारान्तमूलमंत्रेण ध्यानागारे पादपद्मगणेशं वटुकंत
था योगिनीमातृकांश्चैव देवताक्षेत्रपालेनयेवच संपूज्यैव वसहं गजेन्द्रासमपाद पुरस्सरं अस्त्रमंत्रे
णामंत्रज्ञो रक्षामात्मनिकारयेत वक्ष्यमानेन मंत्रेण पुष्पांजलित्रयं दापयेत् मंत्रोयथा उ
क्तं वीरतंत्रे येवात्र संस्थितादेवा राक्षसाश्च भयानकाः पिशाचा सिद्धयोगध्वा गंधर्वाप्सर
सोगणाः योगिन्यो मातरो भूतास्सर्वाः स्खलेचरस्त्रियः सिद्धिदाता भवंतत्र तथा च मम रक्ष
काः प्रणम्यमनुनानेन पुष्पांजलित्रयं दापयेत् श्मशानाधिपतिपश्चात् भैरवं कालभैरवम्
महाकालं यजेद्यत्नात् सर्वादिदिक्चतुष्टये पाद्यादिभिः स्वसंपूज्य बलिं पश्चान्नियोजयेत्
बलिदानप्रकारमाह यथा एवं श्मशानाधिपतिं पंचोपचारैः संपूज्य अनेन बलिं दद्यात्
ॐ यथा ॐ ह्रूं श्मशानाधिप मम अभीष्टं महाबलिं गृह्ण गृह्ण २ खाद २ पच २ विघ्नि

51

आ॰ 101 वारणार्थं कुरु सिद्धिं मम प्रयच्छ स्वाहा। ततो दक्षिणस्यां शववह्नेर्भैरवं संपूज्य ॐ ह्रूं भैरव भयान
क॰ क श्मशानाधिप इमम् आमिषान्नं ह्रूं महाबलिं गृह्ण २ गृह्णापय २ विघ्नविवारणार्थं कुरु सि
द्धिं मम प्रयच्छ स्वाहा। ततः पश्चिमायां शववत्मायां आदिभिकालभैरवं संपूज्य ॐ ह्रूं कालभैरव
श्मशानाधिप इमं सामिषान्नं ह्रूं महाबलिम् इत्यादिना बलिं दद्यात् ततउत्तरे शववत्मायां आदि
महाकालं संपूज्य ॐ ह्रूं महाकाल श्मशानाधिप इमं बलिम् इत्यादिना बलिं दद्यात् चितामध्येत
तो दद्याद्बलित्रयमनुत्तमम् ॐ कालरात्रि महाकालिकालिके घोरनिस्वने गृह्णेमं बलिं
मातर्देहि सिद्धिं ममेत्युत्तमं कालिकायै बलिं दत्वा भूतनाथाय दापयेत् ह्रूं फ्रां ह्रीं भूतनाथा
ते श्मशानाधिपस्वपि प्रणवाद्येन मनुना दापयेद्बलिमुत्तमं ह्रूं भूतनाथ श्मशानाधिप इमं
त्रः ह्रूं फ्रां ह्रीं मे सर्वं श्मशाननाथं ते चाधिपाय श्मशानमस्तके दत्वा शववस्त्रमपहरेत् नाराचेन ब
लिं दत्वा पंचगव्येन संदरि अद्भिः संप्रोक्षणं कृत्वा पीनवस्त्रे लिखेत् ततः भूर्जे वा वटपत्रे वा मंत्रा
पीठमनुं तथा पीठमास्तीर्य तस्मिन्नेव शरीरासनं ततः वीरार्दनेन मंत्रेण चतुर्दिक्षु रक्षां कुर्यात्
वीरार्दनमंत्रस्तु ह्रं ह्रे ह्रीं ह्रीं कालिके घोरदंष्ट्रे प्रचंडे चंडनायके दारय २ हन २ असि महाविघ्नं छे
दय २ स्वाहा ह्रूं फट् अनेन मंत्रेण लोष्टं दशदिक्षु विनिक्षिपेत् यदि साधको भयविह्वलो भवति ५८

51A

102 तदा सर्वैः सुहृद्वर्गैः परिरक्षणीयः ततस्तु तत्संकल्पोक्तमनुष्ठानादिन्यासजालं समाप्येष्ट
देवतां संस्मृत्य संकल्पं कृत्वा इष्टदेवतां ध्यायन्मंत्रं जपेत् संकल्पमस्तु अद्येत्यादि अमुकगोत्रः
श्री अमुकदेवशर्मा अमुकमंत्रसिद्धिकामः अमुकमंत्रस्य इयत्संख्यं जपमहं करिष्ये इति सं
कल्प्य जपेत् जपनियमस्तु एकलक्षस्य मंत्रस्य दिक्सहस्रं जपं चरेत् अन्दोरे अयुतार्धं च अद्य
दिने शतसहस्रकम् अतः परं तु मंत्राणां गजाष्टकसहस्रकं गजोऽष्टसंख्यकः अष्टोत्तरशतसहस्रमित्य
र्थः यद्यसत्यभयंकलनेत्रे बहुयेन ततोऽर्थदानं नपर्ययं यदि किंचिन्न दृश्यते जयदुर्गाख्य
मंत्रेणाभिमंत्र्यादिक्षु निक्षिपेत् मंत्रस्तु दुर्गे दुर्गे रक्षिणि स्वाहा ॐ तिलोऽसि सोमदैवत्यो गोसव
स्तु सिद्धिकारकः भूतप्रेतपिशाचानां विघ्नप्रशांतिकारकः अमंमं च समुच्चार्य तिलादि दिक्षु वि
निक्षिपेत् ईशानादिचतुर्दिक्षु रिति शेषः ततः सप्तदेशान्ता पुनस्तत्रैव संविश्य पुनरिष्ट
ष्टदेवतां ध्यात्वा संस्मृत्य पुनर्यजेत् यदागम्य वरं गृहाण इति वाक्यमुदीरयेत् तदा तो कार
येत्स तन्मंत्रीजपपरायणः ततः संस्कारयित्वा वरयेद्धरमुत्तमं जपादौ बलिमाहृत्य जपा
न्ते च बलिं हरेत् तथाक्तं योगिनीहृदये जपांते च बलिं दत्वा पंचगव्येन सुंदरि देवतायै य
थाविधि माहिषं छागलं वापि रहितं वरमेव च जपांते जलमध्ये वा बलिं दद्यादिति भाष्यते पिष्ट

52

श्रा 103 केनबलिंदद्यान्माहिषंछागमेववा बलिंचयवपिष्टकनिर्मितंधान्योद्भवंवाबलिंदद्यात् पुन
क: र्येत्थवदेदहंकुंजरंदेहियाचेति दिनांतेप्रदास्यामिप्रतिज्ञांश्रावयेत्ततः इतिप्रतिज्ञांसंस्मृत्य
गदंगछेद्यथासुखम् अपरेह्नितत्तोदद्याद्धिष्टेननरंकुंजरान् तथाचोक्तंकालिकापुराणे
यवक्षोदमयेवापिशालितोदमयेपिवा चंद्रहासेनविधिवन्मंत्रेणघातयेत् चंद्रहासे
णखड्गेन समायसाधनेदेविद्विणीएणंविभवाविधिः गुरवेगुरुपुत्रायतत्पत्न्यैवानिवेद
येत् परेह्निनित्यक्रियांकृत्वापंचगव्यंपीत्वापिष्टकनिर्मितबलिंदद्यादनेन येषांचयजमा
नोहंतेगर्हणंतुबलिमिमाम् इतिबलिंदत्वापंचविंशतिब्राह्मणान्भोजयेत् तथायोगिनी
तंत्रे परेह्निनित्यमाचार्यःपंचगव्यंपिबेत्ततः ब्राह्मणान्भोजयेत्तत्रपंचविंशतिसंख्यकान् पंच
दशाविहीनाह्यथवाक्रमेणैवदशावधि भुक्त्वाचभावैस्सार्धंनिवसेदुत्तमेस्थले यदिनस्याद्द्विज
भोज्यंतदानिर्धनतांव्रजेत् तेननिर्धनतंस्यात्तदादेवीप्रकुप्यति त्रिवारंवानुषड्रात्रंनव ५२
रात्रंतुगोपयेत् स्त्रीशय्यांयदिगच्छेत्तुतत्रयम्व्याधिविनिर्दिशेत् गीतंश्रुत्वातुबधिरोनिस्वता
देस्यदर्शनात् यदिवक्रिदिनेवाक्यंतदास्यमूकनाभवेत् त्रिपंचदिवसेयावद्देवदेवस्यसंस्थितिः
नहीकुर्यात्रंयपवृक्षंबहिर्यातियदातदा नदावग्नंयविसृजष्यौतवन्हंचयार्यते तथाचागमकल्प

52A

104 डुमे अथ वक्ष्यामि संक्षेपाद्धीरसाधनमुत्तमं कृतेन दिवसैकेन सिद्धिं विंदति मानवः यष्टिग्रस्र
स्तभिन्नं स्थूलविद्रूपयोमस्ततम् प्रथममानीयकर्त्तव्ये न ग्राह्यं सवक्रयामस्ते ग्रोथप्रथमयामा
र्धे तत्र गर्त्ते समाहितः पेत्रोष्य चारसामग्रीं सह दीनत्रं सहरेत् गुडार्द्रकरसेनैव सुराज्ञब्रह्मणस्य
च गौडीनैया द्वाविंशेणमाध्वीवैष्णवेन तत्र तु कदलीमल्लमिश्रपूगाणावृक्ष्यरसैः सुरा स्मृ
ता तत्र प्रदानव्या दानव्यैनैव संस्पृशेत् माषभक्तं च गन्धपुष्पं धूपदीपादिकं तथा तिलाकु
पानं स्वर्धेया च स्थापनीयाः प्रयत्नतः ओं आयाय स्वाहा नमः इत्यर्घ्यं पंसने समाविशेत् भूत
शुद्धिं ततः कुर्यात् संयम्य मात्रकान्यसेत् अघोरस्य मनिकंदो देवतां गोनि विन्यसेत् शिखोत्रे
नैव बद्धाग्निप्राकारं बंधयेत् विधिः स्वदर्पणेनेनवारं तामूलभाग्यांचाप्रकल्पयेत् जयतुगां खामेत्रै
ला मृषेपादि हुविन्यसेत् ओं तिलोसि सोमदैवत्यो गोसवस्तु सिकारकः पितृणां स्वर्गदातस्त्व
मर्त्यानां मम रक्षकः भूतप्रेतपिशाचानां विघ्नोपशांतिकारकः इति द्विमान्तिलानामुवार्त
दिक्षु विवादितः कालभैरवनामानं महाभैरवसंज्ञकं वटुकभैरवो भैरवो माषभक्तिब
लिं दिशेत् ततः पूर्वं तालविताग्राप्य स्थापयेत् ततः यदि रक्ताकुर्वक्लिष्टे भैरवास्त्र भयं भवे
त् एलालवंगकर्पूरं जानीयाद्दिरमाद्दकैः तोद्वलतन्मुर्दिमाणं कुर्याद्दधोमुखम् स्या

53

श्रा
क

105 पयित्वा च तत्पृष्ठं चंदनेन विलेपयेत् बाहुमूलात्सुकंठांतं चतुरस्रं विभाव्य च मध्ये पद्मं समालि
ख्य दलाष्टकसमन्वितं तत्र श्रेणीमजिनं कंबलं ताम्रं न्यसेत् पूजाद्रव्यं समन्त्रितौ च हरेच्चूर्णर
साधकं सम्यक्प्राणानमभ्यर्च्य तत्राश्वारोहवर्जितेन कुशं पादतले दत्वा शवकेशान्प्रमार्ज्य च
हुं ठं निबद्धा जुटिकां तत्र देवस्वरूपिणी तस्यां देवं समं शृण्वपकेऽङ्गन्यायमन्त्रवित् ॐ वशंभव
देवेश सर्वकाममसमेष्टसिद्धिं देहि वीरसिद्धिं कुं तावद्भद्राभव देवेश अमुकममेष्टसिद्धिं देहि वी
रसिद्धिं कुं तावत् पहस्तु तस्य स्तुत्वा च चरणौ बंधयेद् हुं ठ ॐ भीममभीरुभवावह भाव्यलोचन भा
वुक त्राहि मां देवदेवेश प्रशवानामधिपाधिप इति पादतले तस्य त्रिकोणं चक्रमुल्लिखेत् तेनो
त्थानेन प्राप्नोति शवश्च निश्चलो भवेत् उपविश्य पुनस्तस्य बाहू निःसार्य पार्श्वयोः हस्तयोः
कुशमास्तीर्य पादौ तत्र निधापयेत् ओष्ठौ संपुटकौ कृत्वा स्थिरचित्तः स्थिरेंद्रियः सदा देवं ५२
हृदि ध्यात्वा मौनी जपमथारभेत् चैलासनाद्यं येनास्मि भयेत्तानेव देततः यत्प्रार्थ्यसे बलिर्वे ५३
न दातव्यं कुंजरादिकं दिनांतरे तु दास्यामि स्वनाम कथयस्व मे इत्युक्त्वा संस्कृतो न्याच्च निर्भ
यश्च पुनर्जपेत् पुनश्च मधुरं वाक्यं वक्ष्यति नयेन वै ततः सत्यं कारयित्वा वरं च प्रार्थयेत्त
तः यदि सत्येन करोति वरं वा न प्रयच्छति तदा पुनर्जपेन्मंत्रमेकाग्रायतमानसः सत्यं कु

53A

106 नैवंलब्ध्वामहत्त्यजेनुत्पार्थिवम् फलेज्ञानमितिज्ञात्वात्तुष्टिकामोचयेत्ततः शिवंप्रार्थ्यालय
मेस्थाप्यवंथनंमोचयेत्पदे पादचक्रमार्जयित्वाथ नाद्भव्यंजलेक्षिपेत् शार्वेजलेथगंगेवानि
त्यस्नानमाचरेत् ततस्तुसुरसंगत्वाबलिंदद्यात्दिनांतरे अग्निमरात्रौयेषांदेवानांयजनमा
नोहृतोग्रहृणंतुमयादत्तमिमंबलिं इतियैर्यंविनानेनवनरकंजरत्कराम् दत्त्वाविष्णुमयाने
वकर्तव्यंसमुपोषणे परेह्निनित्यमाचार्यःपंचगव्यंपिबेत्ततः ब्राह्मणान्भोजयेत्त्र्यंचविप्रा
निसंख्यकान् पंचपंचविहीनात्वाक्रमेणैवदशावधिः ततःस्नात्वाचभुक्त्वाचनिवसेडत्रमस्था
ले यदिनस्याद्द्विजभोज्यंतदानिर्धनताव्रजेत् नेनचित्रियतनंतस्मात्तदादेवःप्रकुप्यति त्रिरात्र
वाथषड्रात्रंनवरात्रंचगोपयेत् स्त्रीशूद्राद्यायदिशिक्षेदेह तदाव्याधिंविनिर्दिशेत् गीतंकृत्वा
वत्वधिरंनिश्चतुस्तस्यदर्शनात् यदिवक्तिदीनवाक्यंतदास्यमूकतांव्रजेत् येचदशदिनेयाव
वृद्देहेदेवस्यसंस्थितिः तस्यैकस्याकृयपुष्पंवहियातियदीतदा तदावश्यंपरित्यज्यधौतवा
स्त्रंचधारयेत् देवगोब्राह्मणादीत्रूप्रत्यहंसंस्पृशेत्तुचिः प्रातर्नित्यक्रियांतेतुबिल्वपत्रोदा
कंपिबेत् ततःस्नायाद्यथागंगायंप्राप्तेषोडशावासरे साद्दांतमूलमुच्चार्यतर्पणान्तिनमःपठेत्
अनेनविधिनादेवंतर्पयेद्दृषिकोत्तमः तथाचमुंडमालायां श्रीदेवीरहस्यातिरहस्यंमेपुरश्चर्या

54

प्रा॰ 107 विधिश्रमो वदस्व यदनुष्ठानात्सर्वकामा भवंति हि ईश्वर उवाच गृहीत्वा सद्गुरोर्दीक्षां शुभे काले दिवा
क॰ निशि आगमोक्तवैष्णवः प्रोक्तः मध्यमः शैवदीक्षितः अनयादीक्षितो यो वै स एव परमो गुरुः प्रा
प्ते दीक्षिते तु पुण्यगंगायां नद्यां पर्वतमस्तके पवित्रे च स्थले देवयजने हि यथाप्रमादयन् शक्तिदेवि कामरू
पादौ तत्र स्थित्वा जपेल्लक्षं साक्षाद्देवीस्वरूपकः ततो भवति विघ्नेयं त्रैलोक्यवशकारिणी
वशर्द्दशसहस्राणि सिद्धि विनेहरयदाबुत्र ततो भवति देवेशि तत्वज्ञः सततः पुमान् कायेन मनसा
वाचा सर्वर्णीकपानादिभिः सेतोष्णपरमाभक्त्या गुरुदीक्षां समाश्रयेत् प्रातःकालं समारभ्य
जपेन्मध्यदिनावधिः प्रथमेहनि यत्संख्यं तत्संख्यं दिने दिने न्यूनाधिकं न जप्तव्यं यदा त्रिगुणवित्जपेत्र
च हविष्यं भक्षयेद्भस्मात्रौ न कदाचिद्दिनेनच लब्धाहारं प्रकुर्वीत युवतेः पूजनं स्वतः मैथुनं ह
विष्यं पशाकादि विहितानि फलं पयः मूलं ससत्तु यवो वान्नो भक्ष्याण्येतानि मेत्रिणाम् तथा ह्य
न्यमन्यमतेक्षे शाकं मूलं फलं भ देहविष्यं पाकं वो यथवा अथवा क्षीरमेवं त्रसात्सु स्वरएतत ५४
ये निषिद्धमाह मधु मांसं तथा क्षारं लवणं तैलमेव च स्त्रियं पर्युषितं चैव नित्यं हि कोद्र
षितं कांचकं गंजनं विल्वं कलंजं लशुनं तथा मसूरं कोद्रवं माषं मंडूकं चणकादिकं ता
म्बूलं कांस्यपात्रे च दिवाभोजनमेव च एवमादीनि चान्यानि जपकाले विवर्जयेत् अन्यथा भो

54A

108 जनानेषां सिद्धिं नाप्नोति साधकः गंजनं मूलकाष्ठानि रक्तवर्णं गालवश्च इति प्रसिद्धिः मेद्र
कमांडू कद्गनिप्रसिद्धिः कोद्रवं कोद्रव इति प्रसिद्धिः स्त्रोनारीमस्य नारी वा शजयेत्सर्वपर्वसु
नाचमैसंगतिः कार्या सर्वप्राणिहितेरतः यस्तु वा वानपः प्रोक्तः स्तद्रूपं शृणु मत्क्रमात्
तत्र द्रव्यैर्जपस्थाने होमं कुर्याद्दिने दिने होमस्नानं तर्पणं च तीरोमार्ज्जनमेव च तद्रूपाणि
न विप्रेंद्रा रूपवतीः कुलकन्यकाः संभोजयेत्प्रीतियुते द्रव्यैर्नानाविधैः शुभैः तर्पणेऽस्य श्र
कामम्यह हंसपारायणे आज्येन मधुना वापि खरयामे च साधकः ब्राह्मणैः क्षत्रियैः वैश्यैः
शूद्रैः स्वसाध्ययाक्रमम् विना मत्स्येन मांसेन पुंश्चलीसेवनं विना न मंत्रसिद्धिर्भवति तस्माद्यत्न
पुरो भवेत् तयास्मात्यनेसकलं वस्तु वर्जयेत्कनकादिकम् कनकं पात्रकीतसाद्गुर्मोवेदवि
दां वरः कालिकापुराणे ब्राह्मणस्तु सुरां दत्त्वा ब्राह्मण्यादेव हीयते सुरां तु रुधिरं दत्त्वा ब्रा
वद्ध्यमवाप्नुयात् एवं चासवे सर्वं चरन्मज्जातिपरं पातकहेतु चरन्मज्जातिपरं शूद्रजातिपरं
तु स्वधर्मः अन्येषां पातकहेतुत्वात् तदुक्तं भैरवीतंत्रे क्षीरेण ब्राह्मणस्तर्पयेद्धृतेन नृपवंशजाः
माक्षिकैर्वैश्यवंशोद्भवा आसवैः शूद्रजातिभिः होमाय यत्प्रोक्तो देवेषु कुर्यात्तद्द्विगुणं जपम् या
ह्जाद्यप्रोक्तः स्याद् द्रव्याभावे कलशं दारे केवलं जपमात्रेण पुरश्चर्याविधीयते द्विवाप्यथ दिवा

श्री॰ 109 वीरोभवित्साम्राध्यकोन्नमः स्वेच्छाचारपरोभूत्वाएकान्तेसर्वयाजपेत् दिव्यादिभावस्तुभावच्
कृ॰ छामणावनुसंछेयाः मत्स्यमांसाद्यनुष्ठानेष्वकः कुर्यात्सुरक्षियो वकराश्रीश्मशानेवाशिवेवा
मठाबालयोः मध्यात्मभैरवीकल्पविधानेस्वरवर्णितं हस्तमात्रनिखातेनमंडेवाविजनेवने
वीराणांकथितंदेविसाध्यनेमुविड्स्करम् कुमारीपूजनादेवपुरश्चर्याविधिस्ततः तथाचोक्तं
गंधर्वतंत्रे कुमारिकाद्विवर्षातुत्रिवर्षाचत्रिमूर्तिनी चतुर्वर्षातुकल्याणीपंचवर्षातुरोहिणी
षड्वर्षातुभवेत्कालीसप्तवर्षातुचंडिका अष्टवर्षासंभवेत्दुर्गाचनववर्षका दशवर्षासुभद्रा
नितानामभिःपरिकीर्तिता सेव्राद्युक्तमयीलसंमीमातृणांतूपथाविशीम् नवदुर्गामिकांसादा
कन्यामावाहयाम्यहं नानाजातिभवाःकन्यारूपयौवनसंयुताः अत्यंतप्रौढाबालावार
ज्जनीयायथाविधि द्रव्यैःप्रियकरैर्भक्ष्यचोष्यभोज्यादिभिःशुभैः पूजयेत्परभावेननाना
रूपामनोहराः भगिनीकन्यकावापिदारास्त्रीवाकुटुंबिनी मातृवर्ज्यंसदापूज्यानानाजाति ५५
समुद्भवाः अथवान्यप्रकारेणपुरश्चरणमिष्यते सूर्योदयंसमारभ्ययावत्सूर्योदयंभवेत्
तावज्जपेन्महेशानिपुरश्चर्याविधीयते कृष्णाष्टमींसमारभ्ययावत्कृष्णाष्टमीभवेत् सहस्रसं
ख्याजपेनपुरश्चरणमिष्यते शुक्लांचतुर्दशीप्राप्यनवम्यंतेमहोत्सवे अष्टमीनवमीरात्रौस

55A

110 ज्ञो कुर्याद्विशेषतः दशम्यां पारणं कुर्यान्मत्स्यमांसादिभिः प्रिये षट्सहस्रं जपेन्नित्यं भक्ति
भावपरायणः चतुर्दश्यां समारभ्य यावदन्या चतुर्दशी तावज्जपेन्महेशानि पुरश्चरण
मिष्यते केवलं जपमात्रेण मंत्राः सिद्धा भवंति हि विना होमादिदानेन विशेषात्पीठपूज
ने योनिपीठे महापीठे कामरूपे मयापरं तयोरेकतरे शक्ते रुद्रदेहे द्वापरः अथवान्य
प्रकारेण पुरश्चरणमिष्यते प्रारब्धकाले चतुर्थ्यादिनवम्यंते विशेषतः भक्तिनाशं जयित्वा
च नवद्वात्रिंससहस्रकम् जपेदेकाकी विजने केवलं निशिमालये अष्टम्यादिनवम्यंतं तु
पंचामयरो भवेत् अष्टम्यां सिद्धवेलायामष्टोत्तरलयायुते प्रविश्य मंत्री विधिवन्नासमभ्य
वायत्नतः शवीकन्यामासाद्य जपहोमादिकं चरेत् केवलं कामदेवोसौ जपादष्टोत
राच्छ्रुतात् अष्टम्यां वा चतुर्दश्यां नवम्यां च विशेषतः रात्रियोगेन देवेशि गत्वा चापि कानन
ने दिगंबरो मुक्तकेशो भूत्वा च स्तवसंदरि प्रजपेद्युतं मंत्री देदेवताभावतत्परः मंत्रसि
द्धिर्भवेत्तस्य देवि देवत्रपूसुभूतले अथवा प्रजपेद्विद्यां शून्यागारे चतुष्पथे राजद्वारे श्म
शाने वा सम्भवेत्साधको नमः भौमाष्टवस्त्रांलिखित्वा च यो जपेत्साधकोत्तमः मंत्रसिद्धिर्भ
वेत्तस्य चंडिकानत्रपूजनात् कुजे वा शनिवारे च नरमुंडसमाहृते पंचगव्येन मिलितं वद

56

श्रा॰ ॥। मात्रैवविशेषतः निर्दिष्टमहतो ग्रहणार्थमानतो निर्जनेवने एकाकी प्रजपेन्मंत्रं संभवेत्कपादपः
रु॰ एकरात्रौ जपेन्मंत्रमेकाकी निर्जनेवने संभवेत्साधकश्रेष्ठो महासिद्धीश्वरो भवेत् विना
यां प्रजपन्मंत्रं मंत्रसिद्धिर्न संशयः इति भैरवानंदसंहितायां सनत्कुमारसंहितायां अष्टवाव्य
प्रकारेण पुरश्चरणमिष्यते चंद्रसूर्यग्रहे चैव ग्रासमावधि विमुक्तितः यावत्संख्यमनुं जप्त्वा ता
वद्धोमादिकं चरेत् श्राद्धदानानुरोधेन यदि जाप्यं जपेन्नरः संभवेद्दैवनाशो हि पितृसमन
यत्ययः इति सनत्कुमारसंहितावचनेन प्रमीतपितृकस्यापि ग्रहणे जपस्यावश्यकत्वेऽस्य
मुक्तेः बहुवचनव्यापकोपपत्तेः तथापि सर्वस्वेनाधिकं तंत्र्य श्राद्धं वाराहदर्शने अकुर्वा
णस्तु नरश्राद्धं पंकेगौरिव सीदति तथा च विरुद्धधर्मसमवाये भूयसां स्यात्साधर्म्यमिति
जैमिनिन्यायात् एवं च यद्यप्यदत्तकः श्राद्धपिष्टिमतिं सदा हरणम् श्रनीदेश्य स्तामान्या तेऽ
लाइति त्रविधीयते इति छंदोगपरिशिष्टीयात् स्मृतेर्बालवत्नेन सनत्कुमारीयस्यापि ५६
विषयापत्तिरिति चेन्नैवम् आरब्धपंचांगपुरश्चरणमध्ये एवोपनिपतितसूर्यग्रहणवि
षयत्वेनैवोपपन्नेः एवं च निद्धार्थवादेन ग्रहणश्राद्धस्याश्वयकत्वप्रतिनिधिद्वारा तदि
ति अष्टमतमे रवे यडक्रमसारसर्वस्वे सर्वतंत्रगोपितं वीरसिद्धे वियोनंदेवदेवेन शंभुना
नुः

56 A

112 यस्यविज्ञानमात्रेणमंदभाग्योपिसिद्ध्यति अहोरात्रेणकालेनहेलयासाधकोमम: मंत्रंनी
त्वागुरोःप्राग्‌वृगुरुभक्तिपुरस्सरः मंत्रश्रोत्रास्यहन्त्रेतत्प्राणाविज्ञायसत्त्वतः यत्नाच्चकी
लकंसोनाकुयोमंत्रपुरश्चिक्रियमम् पुरश्चरणसम्पन्नोवीरसिद्धिंसमाचरेत् पुत्रदारधन
स्नेहलोभमोहविवर्जितः मंत्रंवासाधयिष्यामिदेहं पातयाम्यहं प्रतिज्ञामीदृशींकृ
त्वाबलिद्रव्यंसमाहरेत् यस्यमेत्रेयपङ्क्तेनज्ञ्‌यएभ्यविधानतः स्त्रीवर्ज्यंपतितंवर्ज्यंकुष्ठ
रोगादिनिंदितं नङ्गभिन्नंत्र्यतंवृद्धनपशुंधितमेववा स्त्रीजनंचवरूपंवाकुरूपंचैवव
र्जयेत् संस्याप्यकुणशाथ्यायामुनानेदिविरूपिणम् कृतनित्यक्रियादिस्तुविदित्वापि
तकीलयेत् यंत्रेलिखितंनावीरस्यलल्भेभ्यर्चयेद्देवता बलिदानेनसंतोषाशावस्यहृ
दिसंस्थितः बलिमाहृमंडमालाया केवलंबलिदानेनतुष्टाभवतिसुंदरी कथि
तेएवंमयासम्यक्प्रश्रमेकुरुशंकर योगीन्द्रवरः अन्यतुगुह्येदेवेशिविधानंबलिसर्जितम्
कथयामिवरारोहेसर्व्यसिद्धमवसंप्रतम् विधिद्रीरगुडंचान्नंपायसंशर्करान्वितम् पा
यसंलोड्डमाद्रंवानारिकेलंसमोदकं शाकमेवखंडंचसाड्डकंमधुरशर्करं रंभाफलंलं
डुकंचभर्जितान्नंचपीठकं पाल्मत्स्यंचपाठीनशाकुलंचिंकटंतथा मङ्गुरंचिल्लिषंदया।

57

श्री॰ 113 न्मेसमेषस्यतेनतम् पश्चिमांसं वराहो हस्तिमेनानासमुद्भवं छागमांसं मेषमांसं गोधिकाह
क॰ रिणीतथा जम्बूकेमत्स्यमांसेच गोधिकीमांसमेवच नानाखेजनकुग्राणिखाद्यजनानिमधु॥
नि च इक्षुरसं घृतेनाक्तं निशायां दिवसे पि वा बलिं दद्याद्विशेषेण कुलमध्ये शुभे दिने छाग
दानेभवद्धर्मो मेषेसंपदैनैः कविध्रुवं महिषेधनसिद्धिःस्यान्नरोभोगफलंलभेत् दत्तेदाडि
मत्रसिद्धिःस्याद्गोधिकायांमहाफलं मेषहत्ते मे सर्वसिद्धिःस्यात्सर्वसिद्धिरनुत्तमा ललाटहस्तहृद
यशिवोवक्षस्तु मध्यतः स्वदेहात्कुधिरं [illegible] देहं दत्वापरः सर्वदानेनदेवेशिमहायोगी
श्वरोभवेत् रात्रौप्रहरयामार्द्धे पूजार्थं बलिमाहरेत् पंचोपचारद्रव्याणि सुरसानि प्र
यत्नतः गुडार्द्रकरसेनैव सुरात्रब्राह्मणस्य च गौडीनेयाक्षत्रियेण माध्वीवैश्येन तत्र तु
कदंबीफलसंमिश्रं शूद्रेणमधुकस्रवसंयुताः श्रद्धेनात्रप्रदानात्रदेयावैश्येवसंस्कृतेन स्वरा
नुत्रिविधादेविस्फाटिकीडाकिनीतथा कार्त्तिकीचात्रवैदानेयत्नसिद्धिरनुत्तमा डाकि
नीदानमात्रेणसर्ववश्योभवेद्ध्रुवं कार्त्तिकीसुरयादेयाचैवेयंपरमोस्तुतीमं गुप्तिकांज
नंस्तंभादिमारणोच्चाटनादिभिः महासिद्धी [illegible] वसेत्कल्पयुतं दिवि अर्घ्यदत्तेमहे
शानिमहासिद्धिरनुत्तमा रक्तचंदनबिल्वादिजयाकुंकुमवज्जलैः अर्घ्यंदद्यान्महेशानि ५८

114 सर्वकामार्थसिद्धये तथा कुमारी संपूज्य तलजलैर्वा पिकलवीकुंकुमान्वितैः मूलमंत्रेण दे
वि श्रीकृष्णनिर्भयाशुचिः अर्घ्यं दत्वा विशेषेण चक्रे वा तेन पूजयेत् कुमारीपूजने फलं सानो
दीपत्वे पिनिस्मरेत् ताम्रपत्रे कपाले वा श्मशाने काष्ठनिर्मिते शनिभौमदिने वापि शवे वा स्वा
मुद्भवे स्वर्णरौप्यमये वा लोहे चक्रमथ्य विधानतः पुष्पाण्यपि निवेदयेद्दाढ्य कल्हारकुसुमानि
च श्वेतरक्तं जपापुष्पं करवीरं तथा प्रिये नागरं मल्लिकां जातीं मालतीं यूथिकां तथा उत्त
राशोक वकुलश्वेतकुसुमपराजिता बंधुपुष्पं बिल्वपत्रं चम्पकं नागकेसरं रंगिकां त्रिटि
कां वीरं केयत्परिकीर्तितम् अर्कपुष्पं जपापुष्पं वर्बरं च प्रियंवदे अष्टम्यां च प्रदादेनं सेतु
ष्टात्सदेवताः हूंसं वा यदि वा पुष्पं कालिका वरदा भवेत् श्मशाने तु स्वलेरेणैव तुष्टा भ
वती शिवा श्मशानजातपुष्पेण संतुष्टा कालिकापरा वन्यपुष्पैश्च विविधैः संतुष्टा पा
र्वती शिवा आमलकादिपत्रेण तुष्टा पुष्पेण पार्वती अष्टम्यां च चतुर्दश्यां नानापुष्पैः समर्च
येत् श्मशाने रात्रिशेषे वा शानि भौमदिने निशि पूजयित्वा विशेषेण सिद्धीश्वरो भवेत् बलिं
दत्वा प्रयत्नेन भूतशुद्धिं समाचरेत् भूतशुद्धिं ततः कृत्वा करांगन्यासं समाचरेत् ध्यात्वा तु देवी
हे चनाम्य चेताज्जयं चरेत् सर्वतोभद्रविधानेन दिशश्चावलोकयन् नयपेण्दधुंतकिंचित्रभा

58

प्रा. क. 115 षेतनन चस्पृशेत् अहोरात्रं जपं कुर्याद्यावत्सूर्यस्यदर्शनं व्रजेत् वदत्यागत्य चेष्टां वा देहस्फूर्तिकं
रोति वा एतेन ज्ञायते वीर सिद्धिर्देयात्ततो बलिम् देवतां भ्रवगुरुं नत्वा विसृज्य हृदये पुनः
स्थापयेद्ब्रह्मणे ज्येष्ठ हविः प्राशनं तोये विनिक्षिपेत् नारिकाभीमनानारी द्वारसिद्धिं समाहरेत् अथा
सनविधिं वक्ष्ये सर्वतंत्रानुसारतः आसनेन विना सिद्धिर्न विद्येत् सुरासुराणामपि स्तंभने मोहने चै
व वशीकारे यक्षकर्मणाम् मारणोच्चाटने चैव षट्कर्मसु यथाक्रमे आसनं कुरुते मंत्री सर्वका
मार्थसिद्धये तदुक्तं भैरवीतंत्रे मेषव्याघ्रगजोष्ट्रवृक्षानुरगानमिस्तु षट्कर्मसु प्रतीकं विवि
धासनानि क्रमिकं भालाख्यसारंगजम् मोक्षभोगादमासने च कुरुते डोरिणं तथा चैलतं चैवतं
चैवम्स्मात्जिनं शुभं करं सर्वशमणीतं वदुधैः निषिद्धमाह भूमौ भूत भयं कुलदयकरं वंशासनं
रोगदं काष्ठं चैवतथासनं प्रकुरुते शैलं महादुःखदम् वेत्रं पल्लवमप्र त्रिकासनं पुनं त्रिणा
च विहितं वक्त्रं कुष्ठं च क्रैमिजं मासनानिसमकलेमोद्वादिसिद्धिप्रदम् कृष्णाजिने ज्ञानसिद्धिः श्री ५८
मोक्षो व्याघ्रचर्मणि चर्मासने व्याधिनाशो तरुणायाः खमोचनम् कुशासने मंत्रसिद्धिः नात्र
कार्या विचारणा कम्बलं चैव सर्वार्थरक्तं कंबलम् स्वस्तिकादिक्रमेणान्यं विशेषं
त्रनिरामयः स्वस्तिकादीनि वक्ष्यामि आसनानि विशेषतः स्वस्तिकं पद्मकं वीरं चेति चतुष्टयम्
व

58-A

116 जपं प्रशस्तमेतेषु स्मृतिं तं पुनर्वादिशेत् एतेषां लक्षणं वक्ष्ये स्वस्त्यादीनां यथाक्रमात् जानूर्वो
रन्तरे सम्यक् कृत्वा सम्यक् पादतले उभे ऋजुकायः समासीनः स्वस्तिकं तदुदाहृतम् वामोरूपरि वि
न्यस्य दक्षिणं चरणं बुधः वामं पुनर्दक्षिणोरौ न्यस्य बद्धमस्यं विधानतः धृत्वा कराभ्यामङ्गुष्ठेनि
धाय चिबुकं हृदि नासाग्रे वीक्षयेद्धि ह्येतत् पद्मासनमिदं मतम् जपादावेवमाख्यातं पद्मासन
मिदं बुधैः वामं मेढ्रे दक्षिणं पादं न्यसेद्वामं तथान्यतः एतावदेव निर्वर्त्य जपहोमादिकं चरेत् ना
रदीयं तथा प्राह नारायणमनोऽम्बुनिः उभाभ्यामूरुमूलाभ्यामग्रपादावुभावपि उपर्यारोप्य
आसीत पद्मनामतदासनम् एकपादं तथैकस्मिन् विन्यासोरुणि संस्थितम् इतरस्मिंस्तथा चोरौ
वीरासनमिदं स्मृतम् मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि गुल्फान्तरं च विन्यस्य वज्रासनमुद्दी
रितम् अथ मालाविधाने हि प्रवक्ष्यामि विशेषतः अथ मतः करमालाप्रकारमाह तत्राङ्गुलि
जपं कुर्वन् अङ्गुष्ठाग्रेऽङ्गुलिर्जपेत् अङ्गुष्ठेन विना कर्म कृतं तेन तदफलं भवेत् सामान्येतु तदङ्गे तोलमी
ये आरभ्यानामिकामध्यात् प्रदक्षिणक्रमेण च तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु तथा च रु
सपारायणे अनामिकात्रयं पर्व कनिष्ठा च त्रिपर्विका मध्यमायास्त्वयं पर्व तर्जनीमूलपर्वं चेति अ
ये तु पर्वाणि विषय एवं कनिष्ठानामिकामध्याच तुर्थी तर्जनीमता मिश्राङ्गुल्यस्त्रिपर्वास्तु मेध्यमा

59

प्रा॰ 117 चैवपर्विका पर्वद्वयंमध्यमायाजपकालेविवर्जयेत् एतंमेरुंविजानीयाद्ब्रह्मणाऋषितंस्वयं
क॰ उषितेकथितं उक्तेसारसंग्रहे वाग्रचिन्तियनतुसंप्रेयजप्तंमेरुलंघनात् तत्सर्वंनिष्फलंयान्ति
इत्याज्ञापारमेश्वरी पर्वद्वयंमध्यमायामेरुत्वेनप्रकल्पयेत् तथाचगंधर्वतंत्रे तर्जन्यावर्जयेत्
पर्वद्वयंमेरुंचगोपवात् शक्तौमेरुंनमस्तुयाच्छैवेमेरोःप्रदक्षिणं इतिनत्वेवंचेत् कुत्रचिल्लङ्घ
कदाचिन्मध्यमपर्वद्वयग्रहणं कदाचित्तर्जनीयमितिविंप्रारणमध्यातुकस्मिन्विषयेकिंका
र्यंकिंविषयंकिंवाग्रह्यं इतिविषयभेदेनैवजपःकार्यः शाक्तविषयेजपेमध्यपर्वद्वयग्रहणं
तर्जन्यांवर्जनीयमित्याक्षेपः तथाचतंत्रांतरे अनामिकात्रयंग्राह्यंकनिष्ठाचत्रिपर्विका मे
ध्यमापित्रयंदेवितर्जनीमूलपर्विका अथवादेवदेवेशयुक्ताद्यैकथयामिते अनामिकामध्यमा
यामूलाग्रेचद्वयंद्वयं कनिष्ठायास्तर्जन्यास्त्रयंपर्वतत्तथैवच अनामामध्यमाभ्यांचमेरुस्या
त्वितयेशुभे प्रदक्षिणक्रमाद्देविजपेत्त्रिपुरसुन्दरीम् अथवामध्यमानामभ्यपर्वयुगात्म ५५
कं मेरुंप्रदक्षिणीकुर्वन्नानामामूलपर्वगतः आरभ्यमध्यमामूलपर्यंतंगणयेद्बुधः अंगुली
नवियुंजीतकिंचित्संकोचयेत्तलम् अंगुलीनांवियोगेतुछिद्रेयुजपतेजपः अंगुल्यग्रेतुयज्ज
प्तंयज्जप्तंमेरुलंघने सर्वसंधिषुयज्जप्तंतत्सर्वंनिष्फलंभवेत् गणनाविधिमुल्लंघ्ययोजपेत्तुप्रभा

59A

118 वतः गृहीतं निरादरात् सा तस्मान्नियतं गणयेद्बुधः सनत्कुमारसंहितायां अनामामूलमारभ्य का-
निष्ठादितः पर्वत्रय तर्जनीमध्यपर्वान्तमष्टपर्वसु संजपेत् अनामिकात्रयं पर्व कनिष्ठादित्रिपर्विका
मध्यमाया त्रिपर्वं तर्जनीमूलपर्वणि एतद्वचनद्वयेन अष्टोत्तरशतादि विषयं ग्राह्यं विवि
धजपमपरे च श्रीचक्रे च तर्जन्यग्रेण यागमध्ये योजयेत् तच्च पापहृत् इति अर्थान्तरमाला तन्त्रे
श्रीविष्णुईश्वरतन्त्रे मालाविधानमपरं शृणु पार्वति तत्त्वतः येन विज्ञानमात्रेण मंत्रा सिद्ध्यन्ति
नान्यथा अनुलोमविलोमेन मंत्रमं तु विभेदतः मंत्रेणान्तरितो वर्णो वर्णैनान्तरमनुमं कुर्यान्मं
त्रमयीमालासर्वमंत्रप्रदीपिनीम् चरमालेमेरुरूपं लंघयेन्न कदाचन मेरुश्चिव [illegible] सर्वेषां या-
स्यादेवतया हरिः तस्मात् स्थिरचित्तेन कर्म कुर्याद्दिवानिशम् एतत्परतरं रहस्यं चमयोक्तं ते
सुरेश्वरि तयानुमतं कार्यं नात्रियं यस्य कस्यचित् प्रकारान्तरेण क्रमभैरवकल्पे अनुलोम
विलोमस्थैर्बिन्दुवन्मातृकाक्षरैः क्षमेरुकैः साष्टवर्गैः लक्ष्मयावर्णमालया प्रत्येकं वर्णयुक्
मंत्राजप्ताः सुखदाः सिद्धिदाः वैरिसंत्रासप्रीतिनृणामन्येमंत्रास्तु किं पुनः अकचटतपयशा व
र्गास्त्वायातास्तमीरिताः मंत्राणां वर्णयुक्तत्वप्रथमवर्णमुख्येन ततः समुच्चरेद्वर्णमेवमन्यत्र
दर्शनात् अनयायोजपं कुर्यात्तस्य सिद्धिरदूरतः अनुलोममिति आदौ अनुलोमजपः अकारा
दिक्षकारान्तेन जपः पश्चाद्विलोमेन जपः क्षकारादि अकारान्तेन जपः पराप्यः अनन्तकारो

60

प्रा० 119 मेरुत्वेनकल्पनीयः तथाचहकारांतरंलकारोदेयः अन्यथापंचाशद्वर्णानुपपत्तेः शता
क० र्धकेनेति पादेनैवनिर्वहति कथंशतार्धकेननतस्माच्छतार्धकेनकिंविशिष्टेनक्षेनष्ट
थिवर्गवर्जेनलकारेणसहेत्यर्थः एतेननपंचाशद्वर्णहानिरित्यर्थः अथजपमालावि
धानं आदिदांतांमालातुयोगवाहादिमालेतिकीर्तिता तद्वर्णैस्स्वैर्मणिभिर्जपमालांप्रकल्पये
त् रुद्राक्षमालिकादेविजपेनसुमनोरथान् पद्माक्षैर्विहितामालाशत्रुनाशकरीमता कुश
ग्रंथिसुतामालासर्वपापप्रणाशिनी पुत्रजीवफलैःस्तुमाकुरुतेपुत्रसंपदः निर्मितारौप्य
मणिभिर्जपमालेप्सितप्रदा स्वर्णैर्विरचितामालाह्यशान्कामान्प्रयच्छति प्रवालैर्विहितामा
लामौक्तिकैर्विहितानया पुष्कलंधनसौभाग्यंधान्यंचस्फटिकीतथा विहिताशंखमणीभिः
कुरुतेकीर्तिमव्ययम् एतैःपूर्वैःविरचितैर्मालास्यान्मुक्तयेनृणां नृणांजपंकरेकुर्यान्नतुका
म्यमबोधनात् मालाभिस्तुप्रकुर्वीतनित्यंकाम्यंचसाधकः उच्चाटनेऽश्वदंतानांमालाप्रोक्ता
तुसूरिभिः खरदंतैरथोमृतैर्मनुष्यास्थियुताधुना ग्रथितैर्निर्मितामालाशत्रूणांनाशि
नीमता प्रेतदंतैरथोमृतैःकृताव्याजपमालिका साध्यदेहभवैःकेशैःग्रथिताद्विककर्मणि
वैसवीतुलसीमालागजदंतैर्गणेश्वरे त्रिपुरायाजपेशस्तारुद्राक्षैरक्तचंदनैः महाशंखम
यीमालानीलसरस्वतीमता अंगुलीजपसंख्यानमेकमेकमुदाहृतम् पुत्रजीवैर्दशगुणश ६०

120 तं शंखैः सहस्रकम् प्रवालैर्मणिरत्नैश्च दशसाहस्रकं शतं तदेव स्फाटिकैः प्रोक्तं मौक्ति
कैर्लक्षमुच्यते सौवर्णैर्दशसहस्रं तु पुत्रजीवैः शतगुणं तथा कुशग्रंथ्या च रुद्राक्षैरनंतगुणितं
भवेत् शुक्लपद्माक्षमणिभिर्वा प्रसादमितं फलं मातृकानु समुद्भूता माला यापि च तत्फ
ले अथवा तां प्राप्ते कुर्यात्सर्वसाधारणो जपे पंचाशद्भिः काम्यकर्मसिद्धिस्याच्चतुरोत्तरैः
अष्टोत्तरशतैः सर्वसिद्धिरुक्ताक्रमस्तथा मोक्षार्थी पंचविंशत्या धनार्थी त्रिंशता जपेत्
पुष्ट्यर्थं सप्तविंशत्या पंचदशाभिचारके नारदीये तु संप्रोक्तं जपे च दशकस्य वित् अनयोः
पक्षयोस्तस्माद्विकल्पाः स्युर्हि वस्थितेः अथवान्यप्रकारेण मालावसानमितस्ततः तदु
क्तं सागरसंहितायां अंगुल्याजपसंख्यानमेकमेकं वदानेन पर्व चाष्टगुणं विद्यात्पुत्रजी
वफलैर्दश शतं वै शंखमणिभिः प्रवालैस्तु सहस्रकं मौक्तिके दशलक्षं तु स्वर्णैः को
टिरुच्यते कुशग्रंथ्या दशकोटी रुद्राक्षैस्त्वानंतकं मौक्तिकैः श्वेतपद्माक्षैः रुद्राक्षैर्मु
क्तिवेनेर लभेत् सुवर्णं जातानी यादभिचारे तु निंबकं रक्तचंदनपद्मं च पुत्रजीवप्रवाल
कं वशयाकर्षणयोर्विद्रुमो स्ताभो विशेषतः सर्वासामक्षमालानां जपे यत्फलमुच्यते
तत्फलं लभते सम्यक् जपेच्चांगुलिपर्वणि तस्मादंगुलिपर्वाणि जपार्थं प्रबलानि च अंगुष्ठे

श्री
क १२१ नजपेन्मोक्षेनतर्जन्यामभिचारिके मध्यमाबलकामार्थी शांतौपुष्टावनामिका कनिष्ठाकर्ष
णेचास्मंजपकर्मणिशोभने अंगुष्ठेनजपेन्मोक्षार्थन्यैरंगुलिभिस्सह अंगुष्ठेनविनाकर्मकृतंतत
न्निष्फलंभवेत् पंचविंशतिमोक्षार्थीसप्तविंशतिपुष्टकं धनार्थीत्रिंशताकुर्यात्पंचदशाभि
चारके कुल्लुकांतुततोजप्त्वामालापूजांविधायच गृह्णीयाद्दक्षिणेनायनचवामेनसं
स्पृशेत् नाभिहृच्छिरोदेशेषुकुल्लकांपरिचिंतयेत् स्फाटिकरुद्राक्षकपुत्रजीवैरिंद्राक्ष
पद्माक्षमौक्तिकैश्च प्रवालसौवर्णिककोशांबैर्मालाभवेत्साध्यकरीनराणाम् देव्या
भवेत्प्रीतिकरीप्रशस्ताक्षरुद्राक्षमालाथचकौशिकीवा पद्माक्षकैर्वाप्यथमौक्तिकैर्वारुद्रा
क्षमालासततंप्रशस्ता प्रवालैरेवकर्तव्याश्रीपुराख्याविशेषतः अथवाशंखमणिभिर्माला
कार्याविशेषतः अष्टोत्तरशतैर्बीजैः प्रशस्तासर्वकर्मणि शतार्धेनापिकर्तव्यातथैवच
स्त्रिकीर्तिता पंचपंचाशतैवापिमरणोच्चाटनादिषु सात्विकीराजसीचैवतामसीचत्रिधोदि
ता सात्विकीप्रथमामालाद्वितीयाराजसीमता तृतीयातामसीप्रोक्तामारणादौप्रयोज ८१
येत् सूत्रैर्विनिर्मितामालामौक्तिकमणिप्रशस्यते कर्पासैर्वाविनिर्मितामालामारणादौप्रयुज्य
ते पट्टसूत्रैःकृतामालादेव्याःप्रीतिकरीसदा कर्पासैर्वसवीमालापट्टसूत्रैरथापिवा क्रु

61A

122 णांमिर्वा ललेवा पिसैभी मालाप्रकीर्तिता अन्येषामपि देवानां कर्त्तव्या कामचारतः द्वादशाद्वे
रुद्रीमाला कर्त्तव्या सोपवासकैः मेरुस्तैविष्णुमेरुणा दिवाभागे न शस्यते शक्तीनामधिक कर्त्तव्या
रात्रौ भुक्त्वा यथाविधि अष्टम्यां च नवम्यां च चतुर्दश्यां तथैव च त्रयोदश्यां तिथौ कुर्यात् छिवस्या
पि सुरेश्वरि अथ वर्त्तुलनामाला स्थूला सूक्ष्मा नियोजयेत् सर्वकामप्रदेवमाला तु शुभदा सर्वक
र्मणि सर्वव्यापि हि मालन्तो मेरुपार्श्वे हृदये तथा न संस्पृशेत्तु कदाचित्तु स्पृष्टे तावत् तेन पुरः हल्ल
पर्वणि वा कुर्यात् सर्वत्रैव विधिस्मृतः अनामिका त्रिपर्वाणि कनिष्ठान्मूलतो जपेत् मध्यमाया
द्वयं मेरुं रंगुष्ठम्यात्रयेन तथा नवदा विस्पृशेन्मंत्री सहस्रमपुनस्तथा शतमष्टोत्तरं वापि जिह्वेयो
नेमिरसि द्वियेत् त्वं माली सर्वदेवानां प्रीतिदा शुभदा मम शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्व
र्वदा ग्रहणस्यापने स्त्रैव पूजने विनियोजयेत् अथ जपविधानं तयोक्तं कपिलपंचरात्रे
स्वप्नप्रबोधकालाय मंत्राणामभिधीयते अग्नि सोमात्मका मंत्रा विज्ञेयाः क्रूरसौम्ययोः कर्म
णोर्व ह्निताराणा च्चियत्प्राय समीरिताः आग्नेयाम्नवत्सौम्य मध्यष्टे डमिता द्वराः अग्नेर्व्यासे प्र
बुद्धेन प्रबोध्य वनिदक्षिणे भसोन्यस्मिं स्थिते प्राणे सौम्य बोधप्रयाति च नाडीद्वयगते प्राणे स
र्वे बोधं प्रयान्ति ते प्रयच्छेन्निष्फलं सर्वं प्रबुद्धा मंत्रिणः सदा यदा प्राणापानसमायुक्ता शिवशक्त्या

62

श्री॰ 123 न्मेलनं प्रबोधकालो विसर्गाख्यापकालस्ततः परः यथा वामबाहौ यदा वायुस्तदा ह्रस्वानि
कु॰ योनिनाः उभयस्यां यदा वायुस्तदा ह्रस्वानि योनिनाः उभयस्यामप्यवायुस्तदा त्वहितयात्म
कः संपुटीकृत्य मंत्रेण नंभ्यना यांस्सविंदुकान् पुनस्त्वमविसर्गाख्यो स्तकारे केवलं जपेत् एवं
जपमायदि ष्टस्त्वेन्मनुर्वशी तु सिद्धिदः इति स्वप्नप्रबोधकालः अथातः संप्रवक्ष्यामि जपमंत्रस्य
तत्वतः आदौ तु कुल्लुकां ध्यायेन्मंत्रसिद्धिप्रदायिनीम् नाभौ च्छिरोदेशे तु मंत्री नियतमानसः
ध्यानेयथा रक्तां रक्ताम्बरां तस्यां रक्तालंकारभूषिताम् रक्तां वरप्रदां देवीं चिंतयेत् ननीयसीन्
कामराजगतां सार्थवेष्टनत्रयशोभितां स्वमम्पनेनिर्भाभा भास्वद्ग्राहकराकारमंडले एवं विचिंत्य
प्रजपेदासनस्थो जितेंद्रियः एवमादौ कुल्लुकां ध्यात्वा तस्या मंत्रमेतो नरः शान्तो जप्तापुनर्मूल
मंत्रं जपेत् कुल्लुकामंत्रो यथा प्रणवो ह्रूं नमः पञ्चाक्षरो मंत्रोयं चतुरक्षरः ॐ ह्रूं नमः कुल्लुकां चत ६२
तोन्तं चामालाप्रजां विधायच रत्नगीयाद् क्षिणेनाग्रन च वामेन संस्पर्शेन जपस्तु त्रिविधोक्त
यो वाचिकोपांशुमानसः नातिस्पष्टेन चास्पष्टं नद्रुतेन विलंबितं जपेन्मंत्रमभिन्नवर्णं कविन
समाहितः यदुच्चरेन्मंत्री स्पष्टशब्दयुतैः स्वरैः पुनेरुच्चारयेन्मंत्रान्जपयत्स्व वाचिकाः श
नैरुच्चारयेन्मंत्रमीषदोष्ठप्रचालयेन् किंचित्कर्णगोचरस्यात् उपांशुस्स जपः स्मृतः धियायद

62A

124 तरश्रेणीवर्णस्वरूपदात्मिकां शब्दार्थचिंतनाभ्यासस्स उक्तो मानसो जपः उच्चैर्जपादुपांशु
र्यांशस्सहस्रगुणो भवेत् सहस्रगुणमुद्दिष्टस्तस्मादपि च मानसः ध्यायेत मनसा मंत्रं जिह्वोष्ठौ
न च चालयेत् न कंपयेच्छिरो ग्रीवां दंतान्नैव प्रकाशयेत् अक्षराक्षरभेदेन सिद्धविद्याधरागा
णाः हरंति प्रकटं यस्मात्तस्मात् जपं सदा कुरु आसनस्थो जपेत्सम्यग्मंत्रार्थगतमानसः बिंदु
लीने मनः कृत्वा नादमार्गे नियोजयेत् नादमार्गे विलीनं तु मनो नान्यत्र गच्छति प्राणायाम
त्रयं कृत्वा गायत्र्यादौ जपेदिति अनेनैव जपेयस्तु महापातकसंचयः सहस्रशास्त्रि तेनैव
त्त्ययपातके इति मालाया ग्रथनं वक्ष्ये सर्वतंत्रेषु गोपितम् कृत्वा नित्यक्रियो नित्यमेते
ए नेष्वमेव भवेत् यथाकामे यथालाभम् समानीय यत्नतः अन्योन्यसमरूपाणि नातिस्थूल
कृशानि वै कीटादिभिरनुष्ठानि नजीर्णानि नवानि वै गव्यैस्तु पंचभिस्तानि प्रक्षाल्य च पृ
थक् पृथक् गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् पंचगव्यं विजानीयात् सर्वकर्मसु मंत्रवि
त् पयो दधि घृतं तद्वत् क्षौद्रं शर्करा यथाक्रमात् पंचामृतं विजानीयात्सर्वकर्मसु साधकः
नैष्ठिकेनेदं पुण्यं स्त्रीनिर्मितं ग्रंथिवर्जितं त्रिगुणं त्रिगुणीकृत्य सह तंतुं प्रक्षाल्य पूर्ववत् मूलं
रकेन त्र्यावर्तं सप्तांगुलं वा चाभिचारके सत्तं संपादयेद्दिव्यां पट्टसूत्रमथापि वा ग्रथयेत्तेन वा
पं


Incomplete

63

श्रा॰ 125 केपह्माकारेणस्थापिते सूत्रं मणीसूत्रगंधांभः क्षालितं मस्त्रं च निक्षिपेत् तारं सूत्रं त्रिमात्रं कांचनं सूत्रे
क॰ चैवमणिरुद्र्य किंपस्यपुन्जयेदाभ्र नुद्रुयान्चैव प्रकीर्तिता हेमकर्मणयपूजाऋक्षे हिंगुलं जपमाचरे
त् मणीमेकैकमादाय मन्त्रेवयोजयेन्नरः मुखे मुखं च संयोज्य पुच्छे पुच्छे च योजयेत् गोपुच्छसद
पृशीकार्या यद्वा सर्पाकृतिः शुभा तत्सजातीयमेकं तु मेरुत्वेनाग्रतो न्यसेत् एकैकं मणिमध्ये तु ब्र
ह्मग्रंथिं च दापयेत् जपमालां विधायेत्थं ततः संस्कारमाचरेत् क्षालयेत् पंचगव्येन सद्योजातेन सम
त्मनैः सद्योजातं प्रपद्यामि सद्योजाताय वैनमः भवे भवेनातिभवे भजस्व मां भवो
द्भवाय नमः चंदनागुरुगंधाद्यैर्वामदेवेन घर्षयेत् वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः
कालाय नमः कालविकरणाय बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमना
य नमः मनोन्मनाय नमः धूपयेत्तामघोरेण लेपयेत्पुरुषेण तु अघोरेभ्योथघोरेभ्यो घोरघो
रतरेभ्यः सर्वतः शर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः तत्पुरुषाय विद्महे महादेवाय धीमहि
तन्नो रुद्रः प्रचोदयात् मंत्रयेत्पंचमेनैव प्रत्येकं च पृथक् पृथक् ईशानः सर्वविद्यानामीश्वरः ६३
सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिः ब्रह्मा शिवो मे अस्तु सदाशिवोम् समेरुं पंचमेनै
वतन्नामे त्रेणमंत्रवित् संस्कृत्यैवं तु यो मालां तत्प्राणां स्थापयेन्नरः एवं कृत्वा तु माला या

District Health Association.

HOSHIARPUR.



No 2

Agam Kalp Latika

Incomplete

407